| उद्यानम्, बालः, खेलतः, द्वौ, बाला, करोति, पश्यति, वृक्षः, चित्रम्, रचयति, उपविशति, दोलायाम्, पादकन्दुकम् |



i. ..........

ii. ..........

iii. ..........

iv. ..........

v. ..........

© NCERT not to be republished

**2. अधोलिखितं चित्रं वर्णयन्तः संस्कृतेन पञ्चवाक्यानि लिखत —**

**मञ्जूषा**

| |
|---|
| खेलन्ति, क्रीडाङ्गणे, वृक्षाः, बालाः, पादकन्दुकक्रीडा, पश्यन्ति, गृहम् |



i. ..........................................................................................

ii. ..........................................................................................

iii. ..........................................................................................

iv. ..........................................................................................

v. ..........................................................................................

© NCERT not to be republished



Reprint 2025-26

**3. अधोलिखितं चित्रं वर्णयन्तः संस्कृतेन पञ्चवाक्यानि लिखत —**

**मञ्जूषा**

| धावन्ति, प्रसन्नाः, सन्ति, हस्तौ, मेलयित्वा, कन्या, वेशभूषां, धारयन्ति, अस्ति, हसन्ति |
|---|



i. ............................................................

ii. ............................................................

iii. ............................................................

iv. ............................................................

v. ............................................................

© NCERT not to be republished

4. **अधोलिखितं चित्रं वर्णयन्तः संस्कृतेन पञ्चवाक्यानि लिखत —**

**मञ्जूषा**

| बालः, पश्यतः, बालः, वृक्षः, हरितः, पुष्पे, पादपाः, पत्राणि, पश्यन्ति |
|---|



i. ..........

ii. ..........

iii. ..........

iv. ..........

v. ..........

© NCERT not to be republished



Reprint 2025-26

**5. अधोलिखितं चित्रं वर्णयन्तः संस्कृतेन पञ्चवाक्यानि लिखत —**

**मञ्जूषा**

| |
|---|
| शाकविक्रेता, कोलाहलः, समूहः, आकारयन्ति, कदली, आलुकम्, पलाण्डु, गृञ्जनम्, प्रयच्छन्ति, विक्रीणन्ति |



i. ..........

ii. ..........

iii. ..........

iv. ..........

v. ..........



Reprint 2025-26

**6. अधोलिखितं चित्रं वर्णयन्तः संस्कृतेन पञ्चवाक्यानि लिखत —**

**मञ्जूषा**

| |
|---|
| महाभारतम्, श्रीकृष्णः, अर्जुनाय, युद्धसमये, उपदेशान्, मोहात्, ददाति, कर्तव्यपालनम्, युद्धाय, सन्नद्धः |



i. ........................................................................................................

ii. ........................................................................................................

iii. ........................................................................................................

iv. ........................................................................................................

v. ........................................................................................................

© NCERT not to be republished



Reprint 2025-26

**7. अधोलिखितं चित्रं वर्णयन्तः संस्कृतेन पञ्चवाक्यानि लिखत —**

**मञ्जूषा**

| |
|---|
| मुस्लिमधर्मावलम्बिनः, पालयन्ति, सेवई इति मिष्टान्नम्, नूतनवस्त्राणि, वर्धापनानि, आलिङ्गनं, धार्मिकं सौहार्दम्, उत्सवः, मानयन्ति, उपासनागृहम् |



i. ..........

ii. ..........

iii. ..........

iv. ..........

v. ..........



Reprint 2025-26

8. अधोलिखितं चित्रं वर्णयन्तः संस्कृतेन पञ्चवाक्यानि लिखत —

**मञ्जूषा**

| |
|---|
| ईसामसीहः, जन्म, दिसम्बरमासस्य, केक इत्याख्यं मिष्टान्नम्, नूतनवस्त्राणि, गिरिजागृहम्, उपासनापद्धतिः, शैत्यम्, सिक्थवर्तिका, सान्ताक्लॉज इति, उपहारान् वाञ्छन्ति |



i. ..............................

ii. ..............................

iii. ..............................

iv. ..............................

v. ..............................

© NCERT not to be republished



Reprint 2025-26

**9. अधोलिखितं चित्रं वर्णयन्तः संस्कृतेन पञ्चवाक्यानि लिखत —**

**मञ्जूषा**

| |
|---|
| चलचित्रम्, जनाः, सम्मर्दः, चलचित्रपटः, उत्सुकाः, चिटिकम्, खाद्यसामग्री, मध्यान्तरम्, भारतम्, पश्यन्ति |



i. ..............................

ii. ..............................

iii. ..............................

iv. ..............................

v. ..............................

© NCERT not to be republished



Reprint 2025-26

**10. अधोलिखितं चित्रं वर्णयन्तः संस्कृतेन पञ्चवाक्यानि लिखत —**

**मञ्जूषा**

| |
|---|
| भारतद्वारम्, सैनिकाः, गणतन्त्रदिवसः, पथिसञ्चलनम्, ध्वजोत्तोलनम्, भवति, राष्ट्रियपर्व, अवकाशः, जनसम्मर्द, सैनिकाः |



i. ....................

ii. ....................

iii. ....................

iv. ....................

v. ....................

© not to be republished

4

0975CH04

# संवादानुच्छेदलेखनम्

**1. अधोलिखितसंवादं मञ्जूषाप्रदत्तवाक्यैः पूरयत —**

लता – राधिके ! प्रात:काले एव सज्जीभूय कुत्र गन्तुं सन्नद्धा ?

राधिका–1 ..............................

लता – विद्यालयम् ! अस्यां वेशभूषायाम्? तव गणवेश: कुत्राऽस्ति ?

राधिका–2 ..............................

लता – अहा ! काव्यालिस्पर्धा ! बहुशोभनम्। स्पर्धा तव विद्यालये एव अस्ति उत अपरस्मिन् विद्यालये ?

राधिका – 3 ..............................

लता – त्वम् प्रतियोगितायां सम्यग्रूपेण प्रस्तुतिं कुर्या: इति मम शुभकामना।

राधिका – 4 ..............................

लता– 5 ..............................

**मञ्जूषा**

(क) शुभास्ते सन्तु पन्थान:।
(ख) अहं विद्यालयं गच्छामि।
(ग) धन्यवाद: भगिनि।
(घ) विद्यालये नास्ति स्पर्धा, वयं शिक्षिकया सह अपरं विद्यालयं गमिष्याम:।
(ङ) अद्य काव्यालि-प्रतियोगिता अस्ति, अहं प्रतियोगितायां भागं ग्रहीतुं सज्जीभूय गच्छामि।

**उत्तरसंकेत: – 1-ख, 2-ङ, 3-घ, 4-ग, 5-क**

**2. अधोलिखितसंवादं मञ्जूषाप्रदत्तवाक्यैः पूरयत —**

राहुल: – अभिनव ! नमो नम:! चिरात् दृष्टोऽसि?

अभिनव– 1..............................

© NCERT not to be republished

राहुल: – अभिवादये तरुण ! भवता सह मिलित्वा प्रसन्नोऽस्मि।

तरुण: – 2..........

राहुल: – भवान् किं करोति ?

तरुण: – अहं संस्कृतसाहित्ये स्नातकोत्तरपरीक्षां संपाद्य आगतोऽस्मि।

राहुल: – 3..........।

तरुण: – किमर्थम्?

राहुल: – 4..........

तरुण: – संस्कृतपठनेन सह वैज्ञानिकप्रविधीनाम् उपयोगे न कोऽपि दोष:? अहं तु सर्वाणि वैज्ञानिकोपकरणानि उपयुञ्जे।

राहुल: – शोभनम्। 5..........

| |
|---|
| (क) भवान् आधुनिकै: वस्त्रै: सज्ज:, बहुमूल्यं च चलदूरभाषयन्त्रं धारयन् आधुनिक इव प्रतीयते। |
| (ख) मम मनस: भ्रान्तिरियम् अपगता यत् संस्कृताध्येतार: रूढिवादिन: भवन्ति। |
| (ग) अहमपि प्रसन्नोऽस्मि। |
| (घ) परं भवन्तं दृष्ट्वा तु न प्रतीयते यत् भवान् संस्कृतच्छात्र:। |
| (ङ) अहं मातुलगृहं गतवान् आसम्। अयं मम मातुलपुत्र: तरुण:। एनम् मिलतु। |

© NCERT not to be republished

**मञ्जूषा**

**3. अधोलिखितसंवादं मञ्जूषाप्रदत्तवाक्यै: पूरयत —**

माता – पुत्र! त्वम् अधुना किं पठसि?

पुत्र: – 1..........

माता – काऽपि परीक्षा अस्ति संस्कृतस्य किम् ?

पुत्र: – मात:! 2..........

माता – अतीव शोभनम् ! अभ्यासं कृत्वा सोत्साहं स्पर्धायां भागग्रहणं कुरु।

पुत्र: – 3..........

माता – प्रथमं श्लोकानाम् अर्थान् अवबोध, तत: स्मरणं कुरु। एवम् न विस्मरिष्यसि।

पुत्र: – 4..........



Reprint 2025-26

माता – आगच्छ पुत्र ! अहम् सर्वेषां श्लोकानाम् अर्थमपि अवबोधयामि, सस्वरवाचनं चापि शिक्षयामि।

पुत्रः – (प्रसन्नतया) 5 ..............................

(कथयित्वा आलिङ्गति)

**मञ्जूषा**

| |
|---|
| (क) मातः! अतीव स्नेहमयी असि त्वम्। अहं त्वयि भृशं स्निह्यामि। |
| (ख) परमहं श्लोकान् स्मृत्वा अपि विस्मरामि। न जाने कीदृशी प्रस्तुतिः भविष्यति? |
| (ग) मातः! मां श्लोकानाम् अर्थान् अवबोधय। |
| (घ) परश्वः संस्कृतश्लोकोच्चारण-प्रतियोगिता वर्तते। |
| (ङ) अहं संस्कृत-श्लोकान् कण्ठस्थीकरोमि। |

**4. अधोलिखितसंवादं मञ्जूषाप्रदत्तवाक्यैः पूरयत –**

मोहनः – नमो नमः पितृव्य! कथमस्ति भवान्?

पितृव्यः – अहम् सम्यक् अस्मि। अपि यूयं स्वस्थाः स्थ?

1 ..............................

मोहनः – आम् पितृव्य! प्रदूषणस्य स्थितिः तु गभीरा सञ्जाता। अत एव

2 ..............................

पितृव्यः – अवकाशः! परमनेन किं भविष्यति?

3 ..............................

मोहनः – इदं तु सत्यम्। सर्वकारः प्रदूषणनिवारणाय अन्यानपि उपायान् करोति।

पितृव्यः– 4 ..............................

मोहनः – आम् पितृव्य! सर्वकारेण तु अनेके उपायाः कृताः। जनाः सार्वजनिकवाहनानां प्रयोगाय प्रेरिताः, समविषमनियमानां प्रयोगेण वाहनयातायातं न्यूनीकरणीयम् इति च निर्दिष्टम्।

पितृव्यः – वत्स! त्वमपि स्वास्थ्यरक्षणाय तत्परो भव।

5 ..............................

© NCERT not to be republished



Reprint 2025-26

**मञ्जूषा**

(क) प्रदूषणस्य दुष्प्रभावः तु बालैः सह वयस्कानामपि स्वास्थ्ये भवति।
(ख) सर्वकारेण सह सामान्यजनैः अपि प्रदूषणवारणस्य प्रयत्नः करणीयः।
(ग) अपरिहार्यस्थितौ एव गृहात् बहिः गच्छ। यावत् वायौ हानिकारकाणि तत्त्वानि सन्ति, तावत्पर्यन्तं गृहे तिष्ठ।
(घ) देहल्यां पर्यावरणप्रदूषणेन स्थितिः भयङ्करी अस्ति इति श्रुतं मया।
(ङ) विद्यालयेषु अपि त्रिदिवसीयः अवकाशः घोषितः।

**5. अधोलिखितसंवादं मञ्जूषाप्रदत्तवाक्यैः पूरयत –**

रमेशप्रसादः–अभिवादये महोदय!

प्रधानाचार्यः–नमो नमः, किमागमनप्रयोजनम्?

रमेशप्रसादः–1............................................................

प्रधानाचार्यः–परं सत्रस्य मध्ये प्रवेशः कथं संभवो भविष्यति?

रमेशप्रसादः–2............................................................

प्रधानाचार्यः–अस्तु, पश्यामि अहं किं कर्तुं शक्नोमि? भवान् किं करोति? छात्रस्य माता वा किं करोति?

रमेशप्रसादः–3............................................................

प्रधानाचार्यः– सा शिक्षिता अस्ति न वा ?

रमेशप्रसादः– 4............................................................

प्रधानाचार्यः– इदं तु बहुशोभनम्। शिक्षिता माता

5............................................................

**मञ्जूषा**

(क) अहं केन्द्रसर्वकारे वित्तविभागे सहायकाधिकारी अस्मि। मम पत्नी एका गृहिणी अस्ति। सा गृहस्य सर्वाणि कार्याणि सम्पादयति।
(ख) शिशोः आचारव्यवहारेण समं शैक्षिकप्रगतेः अपि अवधानं कर्तुं समर्था भवति।
(ग) अहं भवतां विद्यालये स्वपुत्रस्य प्रवेशार्थम् निवेदनं कर्तुम् आगतोऽस्मि।
(घ) अहं स्थानान्तरितो भूत्वा अत्रागतोऽस्मि, अत एव सत्रस्य मध्ये प्रवेशार्थं प्रार्थये।
(ङ) आम् महोदय! सा स्नातकपरीक्षोत्तीर्णा अस्ति।



Reprint 2025-26

**6. अधोलिखितसंवादं मञ्जूषाप्रदत्तवाक्यैः पूरयत –**

प्रवीरः – मनोज-महोदय! चिन्तित इव प्रतीयसे? किं कारणं खलु?

मनोजः – 1 ........................................................................

अहम् तस्य व्यवहारेण उद्विग्नतामनुभवामि।

प्रवीरः – किं सः आरम्भतः एव उद्दण्डः आसीत्?

मनोजः – 2 ........................................................................

न जाने इदानीं सः किमर्थम् एवम् आचरति? इति न जाने।

प्रवीरः – 3 ........................................................................

मनोजः – कक्षायां पञ्चाशत् छात्राः भवन्ति। किम् एकैकस्योपरि ध्यानं संभवमस्ति?

प्रवीरः – 4 ........................................................................

परम् यदि कोऽपि असामान्यमाचरति, तर्हि तस्य व्यवहारोपरि तु अवधानं दातव्यमेव।

मनोजः – शोभनं कथयसि 5 ........................................................................

**मञ्जूषा**

(क) किं त्वं तस्य परिवर्तितव्यवहारस्य कारणम् अन्विष्टवान्?
(ख) सर्वेषामुपरि तु व्यक्तिगतावधानं न संभवम्।
(ग) अहं मनोवैज्ञानिकरीत्या तस्य व्यवहारस्य कारणं ज्ञास्यामि।
(घ) द्वित्रेभ्यः मासेभ्यः एकः छात्रः उद्दण्ड इव आचरति।
(ङ) न, न, सः तु अतीव विनयशीलः आसीत्।

**7. अधोलिखितसंवादं मञ्जूषाप्रदत्तवाक्यैः पूरयत –**

शुभङ्करः – माधवि! त्वम् अल्पाहारार्थं किम् आनीतवती असि?

माधवी – 1 ........................................................................

अनुरागः– अहम् ओदनं द्विदलं च आनीतवान् अस्मि।

शुभङ्करः– मम माता मह्यं रोटिकां तुम्बीफलशाकं च दत्तवती, परम्

2 ........................................................................



© NCERT not to be republished

Reprint 2025-26

लता – मम पार्श्वे आलुकस्य चिप्स इति पर्पटा: शीतलपेयं चास्ति।

3 ....................................................................................................

शुभङ्कर: – आम्, मह्यं शीतलपेयं रोचते।

आशीष:– 4 ....................................................................................................

किं विस्मृतं त्वया यत् चिप्सादिकानि जंक इति भोज्यवस्तूनि स्वास्थ्याय हितकराणि न भवन्ति।

शुभङ्कर: – यद्वस्तु अस्मभ्यं न रोचते, तत् वयं कथं खादेम?

आशीष:– सर्वदा तथ्यमिदं स्मरणीयं यत् 5 ....................................................................................................

....................................................................................................

**मञ्जूषा**

| | |
|---|---|
| (क) | अद्यैव शिक्षिका संतुलिताहारविषये पाठितवती। |
| (ख) | मम अल्पाहारपात्रे रोटिका, पनसशाकं चास्ति। |
| (ग) | मह्यं न रोचते रोटिका, शाकं च। |
| (घ) | रुचिकरं भोजनं सर्वदा स्वास्थ्यप्रदं न भवति। |
| (ङ) | किं तुभ्यं रोचते? |

**8. अधोलिखितसंवादं मञ्जूषाप्रदत्तवाक्यै: पूरयत –**

आचार्य:– प्रणव! किं त्वं स्वजीवनलक्ष्यं निर्धारितवान्?

प्रणव: – आम् गुरव:। 1 ....................................................................................................

आचार्य:– शोभनम्, तर्हि चिकित्सको भूत्वा जनसेवां करिष्यसि।

2 ....................................................................................................

प्रणव: – महोदय! चिकित्साक्षेत्रे बहुधनार्जनस्यापि अवसर: प्राप्यते।

3 ....................................................................................................

आचार्य:– किम् धनार्जनाय विदेशगमनमेव तव जीवनोद्देश्यम्?

4 ....................................................................................................



© NCERT not to be republished

प्रणवः – आचार्य! किं स्वप्रतिभायाः उपयोगं कृत्वा सुविधाकांक्षा नोचिता?

आचार्यः– अनुचिता नास्ति सुविधानां धनानां च इच्छा, परं

5 ..........................................................................................

**मञ्जूषा**

(क) स्वदेशं प्रति स्वकर्तव्यस्य उपेक्षा न करणीया।
(ख) अहं चिकित्साविज्ञानं पठिष्यामि।
(ग) भारते अध्ययनं कृत्वा विदेशं पलायिष्यसे? किमिदम् उचितम्?
(घ) उत्तमं जीवनलक्ष्यम्।
(ङ) अहं तु चिकित्सको भूत्वा विदेशे जीवनं यापयिष्यामि इति मम मनसि बलवती इच्छा अस्ति।

**9. अधोलिखितसंवादं मञ्जूषाप्रदत्तवाक्यैः पूरयत –**

प्रवीरः – श्वः अस्माकं समावर्तनसंस्कारः (*farewel ceremony*) अस्ति। न जाने कथं द्रुतगत्या वर्षाणि व्यतीतानि।

अतुलः – 1 ..........................................................................................

प्रवीरः – अहं तु अभियन्त्रविज्ञानं पठिष्यामि।

देवेशः – मया तु चिकित्साविज्ञानं पठिष्यते।

नीलिमा– 2 ..........................................................................................

वैष्णवी – अहं "मधुबनीचित्रकला" इत्यस्य प्रशिक्षणं प्राप्य कुटीरोद्योगं चालयिष्यामि। मह्यं चित्रांकनम् अतीव रोचते।

अतुलः – 3 ..........................................................................................

मण्डनः – अस्मिन् कीदृशम् आश्चर्यम् ? 4 ..........................................................................................

देवेशः – त्वमपि मण्डन! तव गणितक्षेत्रे दक्षतां दृष्ट्वा त्वयि भविष्यस्य गणितज्ञं पश्यामि अहम्। त्वं कृषिकार्यं करिष्यसि ?

मण्डनः – 5 ..................................................................................................

अवनीशः– सम्यक् कथितम्। अधुना तु सर्वकारेण भूमिस्वास्थ्यपत्रम् *(soil health card)* अपि प्रदीयते, येन भूमिस्वास्थ्यपरीक्षणं भवति।

सर्वे – भूमेः अपि स्वास्थ्यस्य परीक्षणम्? (हसन्ति)

अवनीशः – अथ किम् ? भूमेः अपि स्वास्थ्यपरीक्षणं कर्तव्यम्।

**मञ्जूषा**

(क) द्वादशकक्षानन्तरं त्वं कस्मिन् क्षेत्रे भविष्यनिर्माणं करिष्यसि?
(ख) अथ किम्? वैज्ञानिकरीत्या कृषिकार्यं कृत्वा अहं देशस्य कृषिसम्पदः विकासे योगदानं करिष्यामि।
(ग) अहो महदाश्चर्यम्! कक्षायाः सर्वाधिका मेधाविनी छात्रा चित्रकलाक्षेत्रे भविष्यनिर्माणं करिष्यति?
(घ) अहं वस्त्रालंकरणविज्ञानं पठिष्यामि।
(ङ) अहमपि कृषिविज्ञानं पठित्वा कृषिकार्यं करिष्यामि।

**10. अधोलिखितं संवादं मञ्जूषाप्रदत्तवाक्यैः पूरयत –**

(विद्यालयात् गृहम् आगच्छति अभिषेकः)

अभिषेकः– मातः! गृहात् बहिः अवकरः प्रक्षिप्तः अस्ति। कः प्रक्षिप्तवान् अवकरम्?

माता – 1..................................................................................................

किमभवत्? त्वं किमर्थं पृच्छसि?

अभिषेकः– मातः! किं गृहाभ्यन्तरं मार्जनेन एव स्वच्छताकार्यं समाप्यते खलु?

माता – 2..................................................................................................

अभिषेकः– मातः! मार्गमुभयतः अवकराणां पर्वत इव दृश्यते, तस्य मालिन्यम् अस्माकं श्वसनतन्त्रे अवरोधं जनयति। एते 3..........................................
..................................................................................................

अत एव अस्माभिः अस्माकं परिवेशः स्वच्छः करणीयः।

माता – त्वं सुष्ठु भणसि। परं किमहमेकाकिनी एव मार्गस्य परिष्करणं करवाणि?



© NCERT not to be republished

Reprint 2025-26

अभिषेक:– 4 ..............................

माता – शोभनं वत्स! परं सद्य: एव तव मनसि स्वच्छताया: संकल्प: कथम् उद्भूत:?

अभिषेक:– 5 ..............................

**मञ्जूषा**

(क) अवकरा: अनेकान् रोगान् अपि जनयन्ति।
(ख) वयम् आरम्भं कुर्म:। शनै: शनै: अन्ये अपि अस्मिन् पावनकर्मणि सहयोगिन: भविष्यन्ति।
(ग) अद्य विद्यालये स्वच्छताया महत्त्वविषये आचार्या पाठितवती।
(घ) सर्वे स्वगृहमेव परिष्कुर्वन्ति।
(ङ) अहमेव गृहस्य मार्जनं कृत्वा अवकरं बहि: प्रक्षिप्तवती।

**11. स्वस्य भ्रात्रा, भगिन्या अथवा मित्रेण सह संवादं पञ्चवाक्यै: स्वशब्दै: लिखत।**

1. ..............................
2. ..............................
3. ..............................
4. ..............................
5. ..............................

© NCERT not to be republished



Reprint 2025-26

# अनुच्छेदलेखनम्

**(श्रवण-भाषण-कौशल-विकासार्थम्)**

## 1. मम परिचय:

मम नाम अनुश्री: अस्ति। अहं त्रयोदशवर्षीया बालिका अस्मि। अहं राजकीय-विद्यालये नवम-कक्षायां पठामि। अहम् चेन्नईनगरे निवसामि। मम गृहे मम पितरौ, ममानुज: च सन्ति। सर्वे मयि स्निह्यन्ति। अध्ययनक्षेत्रे विज्ञानविषय: मे अतीव रोचते। सममेव चित्राङ्कने अपि मम अभिरुचि: अस्ति। भाषासु संस्कृतभाषा मे प्रिया। तत्र वाक्यसंयोजनकाले शब्दरूपधातुरूपप्रयोगे अहम् आनन्दमनुभवामि। भविष्ये चित्रकारिताक्षेत्रे नैपुण्यमधिगमिष्यामीति मे जीवनलक्ष्यम्।

निर्देश:—

अध्यापक: कक्षायाम् आत्मपरिचयस्य आदर्शवाचनं कुर्यात्, छात्राश्च तत् श्रुत्वा स्वपरिचयरूपेण कानिचित् वाक्यानि लिखेयु:।

.............................................................................................................

.............................................................................................................

.............................................................................................................

.............................................................................................................

## 2. पर्यावरण-प्रदूषणम्

अद्यत्वे भारतस्य राजधान्या: देहल्या: वातावरणम् अतीव प्रदूषितं सञ्जातमस्ति। सर्वत्र वायौ विषाक्तानि तत्त्वानि, यथा कार्बनमोनोऑक्साइड, सल्फर ऑक्साइड, हाइड्रोकार्बन, अमोनिया इत्यादीनि व्याप्तानि सन्ति येन जनानां स्वास्थ्योपरि दुष्प्रभाव: भवति। प्रात: सायं च वातावरणे कूहा भवति। अधिसङ्ख्यका: जना: श्वासरोगेण ग्रस्ता: भवन्ति, नेत्रयो: दाह: अपि अनुभूयते। पर्यावरणप्रदूषणस्य कारणानि औद्योगिकसंस्थानां बाहुल्यम्, वाहनेभ्य: निर्गता: धूमा:, पलालस्य ज्वालनेन निर्गता: धूमा:, स्फोटकपदार्थानां ज्वालनम् इत्यादीनि सन्ति। सर्वकार: अपि अनेका: नीती: निर्माय प्रदूषणस्तरं न्यूनीकर्तुं प्रयत्नशीलोऽस्ति परम् अस्माभि: अपि एवं प्रयतितव्यम् येन पर्यावरणं प्रदूषितं न भवेत्।



© NCERT not to be republished

Reprint 2025-26

निर्देश:—

अध्यापक: अनुच्छेदस्यास्य आदर्शवाचनं कुर्यात्। अनन्तरं छात्रा: अपि अनुवाचनं कुर्यु:। प्रदूषणनिवारणार्थं स्वविचारान् अपि लिखेयु:।

......................................................................................................................

......................................................................................................................

......................................................................................................................

......................................................................................................................

......................................................................................................................

......................................................................................................................

### 3. अनुशासनम्

जीवने अनुशासनस्य अत्यधिकं महत्त्वं भवति। अनुशासनपालनेन अस्माकं व्यक्तित्वस्य सन्तुलित: विकास: भवति। समयपालनस्य प्रवृत्ति: विवर्धते। समयपालनेन च सर्वाणि कार्याणि समयेन भवन्ति। अनेन सामाजिकताया: अपि विकास: भवति। कर्तव्याकर्तव्यस्य ज्ञानमपि प्राप्यते, येन वयं मनुष्यजीवनं सफलं कुर्म:। अनुशासनम् अस्मान् सन्मार्गं प्रति प्रेरयति। अनुशासनस्य प्रवृत्ति: अन्त:करणात् एव भवति।

निर्देश:—

अनुच्छेदमिमं पठित्वा कक्षायाम् अनुशासनविषये छात्रा: चर्चा-विचारं कुर्वन्तु। पुस्तिकायां च लिखन्तु।

......................................................................................................................

......................................................................................................................

......................................................................................................................

......................................................................................................................

### 4. विमुद्रीकरणम्

2016 तमे वर्षे नवम्बरमासस्य अष्टम्यां तारिकायां प्रधानमन्त्रिणा विमुद्रीकरणस्य घोषणा कृता। पञ्चशत-रूप्यकाणां सहस्रात्मकानां च रूप्यकाणां निषेध: सञ्जात:। अस्य निर्णयस्य कारणमासीत् जनानां धनाढ्यानां च पार्श्वे यत् कृष्णधनं संचितमस्ति तत् बहिरायातु। मासद्वयम् विमुद्रीकरणेन जनै: अनेकं काठिन्यम् अनुभूतं परं भ्रष्टाचारं रोद्धुं कृतेऽस्मिन् सर्वकारस्य निर्णये



© NCERT not to be republished

सर्वेऽपि जना: काठिन्यम् अनुभवन्त: अपि सहयोगं कृतवन्त:। विमुद्रीकरणस्य परिणामेन सर्वं धनं सर्वा: च मुद्रा: वित्तकोशे समायाता:।

निर्देश:—

छात्रा: परस्परं 'विमुद्रीकरणम्' इति विषयमधिकृत्य चर्चां कुर्वन्तु, पक्षे विपक्षे च स्वमतं प्रकटयन्तु। पुस्तिकायां च लिखन्तु।

..........................................................................................................

..........................................................................................................

..........................................................................................................

..........................................................................................................

### 5. परीक्षा

अहो परीक्षा पुन: समायाता। अस्या: नामोच्चारणेन एव गात्राणि कम्पन्ते, मनसि चिन्ताजालानि आयान्ति। सर्वं पठितमपि विस्मृतमिव प्रतीयते। न जाने कीदृशं प्रश्नपत्रम् आगमिष्यति, कथं च अहं स्पृहणीयान् अङ्कान् लप्स्ये इत्येव चिन्ता गुरुतरा भवति। न जाने केन महापुरुषेण परीक्षाया: संकल्पना विहिता? मन्येऽहम् ईश्वरोऽपि यदि परीक्षार्थी भूयात्, सोऽपि भीतो भूत्वा पलायनं कुर्यात्।

निर्देश:—

शिक्षकाणां निर्देशने छात्रा: परीक्षाविषये चर्चां विचारं च कुर्वन्तु पुस्तिकायां च लिखन्तु।

..........................................................................................................

..........................................................................................................

..........................................................................................................

..........................................................................................................

..........................................................................................................

..........................................................................................................

..........................................................................................................

..........................................................................................................

..........................................................................................................

© NCERT not to be republished



Reprint 2025-26

0975CH05

# 5

# रचनानुवादः

**वर्तनमानकालिकवाक्यानि** —

**प्रयोग:-** छात्रा:! आगच्छत!, वयम् अस्मिन् अध्याये संस्कृतवाक्यसंरचनाकौशलप्राप्ते: प्रयासं कुर्म:। कथं वयम् आत्मन: भावं संस्कृतभाषया प्रकटयितुं शक्नुम: इत्यर्थम् अभ्यासस्य आवश्यकता भवति। अत्र अभ्यासार्थम् कतिपयोदाहरणानि प्रदत्तानि-

यथा-

| | | |
|---|---|---|
| छात्र: पठति | – *Student reads.* | – छात्र पढ़ता है। |
| बालक: हसति | – *Boy laughs.* | – बालक हँसता है। |
| माता आगच्छति | – *Mother comes.* | – माँ आती है। |
| शिक्षक: पाठयति | – *Teacher teaches.* | – शिक्षक पढ़ाते है। |
| कृषक: क्षेत्रं कर्षति | – *Farmer ploughs the field.* | – कृषक खेत जोतता है। |
| श्रमिक: पाषाणं त्रोटयति | – *Labourer breaks the stone.* | – मज़दूर पत्थर तोड़ता है। |
| लिपिक: कार्यं करोति | – *Clerk does his work.* | – लिपिक कार्य करता है। |
| क्रीडक: क्रीडति | – *Player plays.* | – खिलाड़ी खेलता है। |
| छात्र: लेखं लिखति | – *Student writes an article.* | – छात्र लेख लिखता है। |
| अजौ तृणानि चरत: | – *Two goats graze grass.* | – दो बकरे घास चरते हैं। |
| वानरौ कूर्देते | – *Two monkeys jump.* | – दो बन्दर कूदते हैं। |
| सिंहौ गर्जत: | – *Two lions roar.* | – दो शेर गरजते हैं। |
| आचार्यौ पाठयत: | – *Two teachers teach.* | – दो आचार्य पढ़ाते हैं। |
| धनिकौ वस्त्रदानं कुरुत: | – *Two richmen give clothes.* | – दो धनी वस्त्रदान करते हैं। |
| कृषकौ क्षेत्रं कर्षत: | – *Two farmers plough the field.* | – दो किसान खेत जोतते हैं। |
| धावका: धावन्ति | – *Runners run.* | – धावक दौड़ते हैं। |
| श्रमिका: कार्यं कुर्वन्ति | – *Labourers do work.* | – मज़दूर कार्य करते हैं। |

© NCERT not to be republished

| | | |
|---|---|---|
| पाचका: भोजनं पचन्ति | – *Cooks are cooking food.* | – पाचक गण भोजन पकाते हैं। |
| छात्रा: पाठान् पठन्ति | – *Students read lessons.* | – छात्र पाठ पढ़ते हैं! |
| नद्य: वहन्ति | – *The rivers flow.* | – नदियाँ बहती हैं! |
| त्वम् कुत्र गच्छसि? | – *Where do you go?* | – तुम कहाँ जाते हो? |
| युवां किं खादथ:? | – *What do you both eat?* | – तुम दोनों क्या खाते हो? |
| यूयं किं कुरुथ? | – *What do you do?* | – तुम लोग क्या करते हो? |
| अहं पाठं पठामि | – *I read a/the lesson.* | – मैं पाठ पढ़ता हूँ! |
| आवां ग्रामं गच्छाव: | – *We both go to the village.* | – हम दोनों गाँव जाते हैं! |
| वयं भोजनं कुर्म: | – *We eat meal.* | – हम लोग खाना खाते हैं। |

## अभ्यास :

**1. अधोलिखितानां वाक्यानां हिंदीभाषया आंग्लभाषया स्वभाषया वा अनुवादं कुरुत–**

i. वयं वाराणसीं गच्छाम:। – ..............................

ii. त्वं कुत्र गच्छसि? – ..............................

iii. युवां किम् कुरुथ:? – ..............................

iv. यूयं प्रहसनं पश्यथ। – ..............................

v. अहं लेखं लिखामि। – ..............................

vi. आवां गृहकार्यं कुर्व:। – ..............................

vii. वयं भोजनं पचाम:। – ..............................

viii. रमेश: कथां शृणोति। – ..............................

ix. लता गीतं गायति। – ..............................

x. माता जलं पिबति। – ..............................

xi. नद्यौ वेगेन वहत:। – ..............................

xii. बालिका: अभ्यासं कुर्वन्ति। – ..............................

xiii. शिशव: दुग्धं पिबन्ति। – ..............................

xiv. नृत्याङ्गना: नृत्यन्ति। – ..............................

xv. पुरुषा: जलं नयन्ति। – ..............................

© NCERT not to be republished



Reprint 2025-26

**2. अधोलिखितानां वाक्यानां संस्कृतभाषया अनुवादं कुरुत—**

i. हाथी चलता है। – ................................
ii. दो बन्दर कूदते हैं। – ................................
iii. दो लड़कियाँ नाचती हैं। – ................................
iv. वृद्धजन धीरे-धीरे चलते हैं। – ................................
v. महिलाएँ बातचीत करती हैं। – ................................
vi. बच्चियाँ कहानी सुनती हैं। – ................................
vii. दो छात्र पाठ याद करते हैं। – ................................
viii. दो किसान खेत जोतते हैं। – ................................
ix. दो बैल चरते हैं। – ................................
x. दो हंस तैरते हैं। – ................................
xi. लोग काम करते हैं। – ................................
xii. तुम क्या करते हो? – ................................
xiii. तुम पाठ याद करते हो। – ................................
xiv. तुम लोग व्यर्थ समय बिताते हो।– ................................
xv. मैं घूमती हूँ। – ................................
xvi. मैं पुस्तक पढ़ती हूँ। – ................................
xvii. हम दोनों गृहकार्य करते हैं। – ................................
xviii. हम दोनों बातें करते हैं। – ................................
xix. हम लोग स्वाध्याय करते हैं। – ................................

**भूतकालिकवाक्यप्रयोगः—**

बालकः पाठम् अपठत्। – *The boy read a lesson (chapter).*
बालक ने पाठ पढ़ा।

छात्रः लेखम् अलिखत्। – *The student wrote an essay.*
छात्र ने लेख लिखा।



© NCERT not to be republished

| | | |
|---|---|---|
| पाचकः भोजनम् अपचत्। | – | *The cook cooked food.*<br>रसोइए ने भोजन पकाया। |
| धावकः अधावत्। | – | *The runner ran.*<br>धावक दौड़ा। |
| श्रमिकः कठिनं परिश्रमम् अकरोत्। | – | *The labourer worked hard.*<br>श्रमिक ने कठिन परिश्रम किया। |
| कृषकौ क्षेत्रम् अकर्षताम्। | – | *Two farmers ploughed the field.*<br>दो किसानों ने खेत जोता। |
| छात्रौ पाठम् अपठताम्। | – | *Two students read lesson.*<br>दो छात्रों ने पाठ पढ़ा। |
| वृषभौ भारम् अवहताम्। | – | *Two bulls carried the load.*<br>दो बैलों ने भार ढोया। |
| बालकौ गृहकार्यम् अकुरुताम्। | – | *Two boys completed the homework.*<br>दो बालकों ने गृहकार्य किया। |
| जनाः अभ्रमन्। | – | *People walked.*<br>लोग घूमे। |
| बालकाः अहसन्। | – | *Children laughed.*<br>बच्चे हँसे। |
| छात्राः पाठम् अस्मरन्। | – | *Students learnt lesson.*<br>छात्रों ने पाठ याद किया। |
| बालकाः जलम् आनयन्। | – | *A boy brought water.*<br>लड़के जल लाए। |
| युवानः वस्त्रम् अक्रीणन्। | – | *Youngmen brought clothes.*<br>युवकों ने वस्त्र खरीदे। |
| ते कार्यम् अकुर्वन्। | – | *They did the work.*<br>उन्होंने कार्य किया। |

© NCERT not to be republished

| | | |
|---|---|---|
| त्वं किम् अकरो:? | – | *What have you done?*<br>तुमने क्या किया? |
| युवां पुस्तकम् अपठतम्। | – | *You two read books.*<br>तुम दोनों ने पुस्तक पढ़ी। |
| युवां कुत्र अगच्छतम्? | – | *Where did you both go?*<br>तुम दोनों कहाँ गए? |
| यूयं लेखम् अलिखत। | – | *You people wrote an essay.*<br>तुम लोगों ने लेख लिखा। |
| यूयं पाठम् अस्मरत। | – | *You people learned the lesson.*<br>तुम लोगों ने पाठ याद किया। |

## अभ्यास:

**1. अधोलिखितानां वाक्यानां हिंदीभाषया आंग्लभाषया स्वभाषया वा अनुवादं कुरुत–**

i. गजा: अचलन्। – ..............................

ii. सिंह: अगर्जत्। – ..............................

iii. अजौ अचरताम्। – ..............................

iv. वानरौ अकूर्दताम्। – ..............................

v. युवान: अक्रीडन्। – ..............................

vi. वृषभा: भारम् अवहन्। – ..............................

vii. छात्रा: पाठम् अपठन्। – ..............................

viii. बालका: पाठम् अपठन्। – ..............................

ix. त्वं पाठम् अस्मर:। – ..............................

x. युवां कार्यम् अकुरुतम्। – ..............................

xi. अहं कविताम् अस्मरम्। – ..............................

xii. आवाम् ग्रामम् अगच्छाव। – ..............................

© NCERT not to be republished



Reprint 2025-26

xiii. आवाम् भोजनम् अपचाव। – ..........

xiv. वयम् चलचित्रम् अपश्याम। – ..........

xv. वयम् भोजनम् अकरवाम। – ..........

**2. अधोलिखितानां वाक्यानां संस्कृतभाषया अनुवादं कुरुत–**

i. छात्रों ने पाठ पढ़ा। – ..........

ii. शिशु ने दूध पीया। – ..........

iii. माता ने बच्चे को प्यार किया। – ..........

iv. छात्रा ने कविता सुनाई। – ..........

v. माता ने गीता सुनी। – ..........

vi. क्या तुमने काम समाप्त किया ? – ..........

vii. तुम लोगों ने कथा सुनी। – ..........

viii. मैंने गीत गाया। – ..........

ix. हम दोनों ने पाठ याद किया। – ..........

x. हम लोगों ने विज्ञान पढ़ा। – ..........

xi. हम लोगों ने यात्रा की। – ..........

xii. मैं पटना गया। – ..........

xiii. हम दोनों ने खीर बनाई। – ..........

xiv. हम लोगों ने फल खाए। – ..........

**भविष्यत्कालिकवाक्य-प्रयोगः —**

गजः चलिष्यति। – *Elephant will walk.*
हाथी चलेगा।

अजः तृणानि चरिष्यति। – *Goat will graze grass.*
बकरा घास चरेगा।

वानरः कूर्दिष्यते। – *Monkey will jump.*
बन्दर कूदेगा।

© NCERT not to be republished

| | | |
|---|---|---|
| पाचकः भोजनं पक्ष्यति। | – | *Mother will cook food.*<br>रसोइया भोजन पकाएगा। |
| पिता कार्यं सम्पादयिष्यति। | – | *Father will complete his work.*<br>पिता कार्य को सम्पादित करेंगे। |
| मीनाः तरिष्यन्ति। | – | *Fishes will swim.*<br>मछलियाँ तैरेंगी। |
| शिष्याः तथ्यं ज्ञास्यन्ति। | – | *Students will know about the fact.*<br>शिष्य तथ्य जानेंगे। |
| सैनिकाः देशं रक्षिष्यन्ति। | – | *Soldiers will protect the country.*<br>सैनिक देश की रक्षा करेंगे। |
| वैद्यौ औषधं दास्यतः। | – | *Two doctors will give the medicine.*<br>दो चिकित्सक दवा देंगे। |
| नर्तकाः नर्तिष्यन्ति। | – | *Dancers will dance.*<br>नर्तक नाचेंगे। |
| अभिनेत्र्यः अभिनयं करिष्यन्ति। | – | *Actresses will act.*<br>अभिनेत्रियाँ अभिनय करेंगी। |
| शुकाः वक्ष्यन्ति। | – | *Parrots will speak.*<br>तोते बोलेंगे। |
| त्वं विद्यालयं गमिष्यसि। | – | *You will go to school.*<br>तुम विद्यालय जाओगे। |
| त्वम् उपाधिं प्राप्स्यसि। | – | *You will get the degree.*<br>तुम उपाधि प्राप्त करोगे। |
| युवां कीर्तिम् अर्जयिष्यथः। | – | *You will get fame.*<br>तुम यश पाओगे। |

© NCERT not to be republished

| | | |
|---|---|---|
| यूयं जनसेवां करिष्यथ। | – | *You will serve people.*<br>तुम लोग जनसेवा करोगे। |
| अहम् आलस्यं त्यक्ष्यामि। | – | *I will leave laziness.*<br>मैं आलस्य का त्याग करूँगा। |
| आवां संगीतं श्रोष्यावः। | – | *We both will listen to music.*<br>हम दोनों संगीत सुनेंगे। |
| वयं देवं नंस्यामः। | – | *We will pray to God.*<br>हम लोग देव को नमस्कार करेंगे। |

## अभ्यासः

**1. अधोलिखितवाक्यानां हिंदीभाषया आंग्लभाषया स्वभाषया वा अनुवादं कुरुत—**

i. सेवकः पात्राणि प्रक्षालयिष्यति। – ..................

ii. दाता याचकाय धनं दास्यति। – ..................

iii. स्थपतिः भवनं निर्मास्यति। – ..................

iv. पत्रवाहकः पत्राणि प्रेषयिष्यति। – ..................

v. तृषार्तौ जलं पास्यतः। – ..................

vi. क्षुधार्ताः रोटिकां खादिष्यन्ति। – ..................

vii. वृक्षाः फलिष्यन्ति। – ..................

viii. गायकाः गीतानि गास्यन्ति। – ..................

ix. आलोचकाः निन्दिष्यन्ति। – ..................

x. त्वं दुग्धं पास्यसि। – ..................

xi. यूयं पादपान् सेक्ष्यथ। – ..................

xii. अहं कथां श्रोष्यामि। – ..................

xiii. आवां शाटिकां क्रेष्यावः। – ..................

xiv. वयं क्रीडिष्यामः। – ..................



© NCERT not to be republished

**2. अधोलिखितवाक्यानां संस्कृतभाषया अनुवादं कुरुत—**

i. वह घर जाएगी। – ..........

ii. वे दोनों चलचित्र देखेंगे। – ..........

iii. वे लोग गीत गाएँगी। – ..........

iv. तुम फल ले जाओगे। – ..........

v. माली पौधों को जल से सींचेंगे। – ..........

vi. पिता धन भेजेंगे। – ..........

vii. भक्त देव को नमस्कार करेंगे। – ..........

viii. तुम इस समय क्या करोगे? – ..........

ix. मैं चित्र देखूँगा। – ..........

x. तुम लोग प्रश्न पूछोगे। – ..........

**3. आज्ञार्थे वाक्यप्रयोगः—**

| | | |
|---|---|---|
| सः पुस्तकं पठतु। | – | *He must read the book.*<br>वह पुस्तक पढ़े। |
| तौ लेखं लिखताम्। | – | *They must write an essay.*<br>वे दोनों लेख लिखें। |
| ते दुग्धं पिबन्तु। | – | *They both must drink milk.*<br>वे लोग दूध पिएँ। |
| त्वं वस्त्राणि प्रक्षालय। | – | *You must wash clothes.*<br>तुम वस्त्र धोओ। |
| युवां नगरं गच्छतम्। | – | *You both must go to town.*<br>तुम दोनों नगर जाओ। |
| यूयं कार्यं समापयत। | – | *You people must complete the work.*<br>तुम लोग कार्य समाप्त करो। |
| अहं मन्त्रं वदानि। | – | *I must recite mantra.*<br>मैं मन्त्र बोलूँ। |

© NCERT not to be republished



Reprint 2025-26

आवां फलानि खादाव। – *We both must eat fruits.*

हम दोनों फल खाएँ।

वयं दुर्गुणं त्यजाम। – *We must giveup our ill habits.*

हम सब दुर्गुण छोड़ें।

## अभ्यासः

**1. अधोलिखितानां वाक्यानां संस्कृतभाषया अनुवादं कुरुत–**

i. छात्र मन लगाकर पढ़ें। – ..........

ii. दो बालिकाएँ गीत सुनें। – ..........

iii. सभी स्त्रियाँ भय त्यागें। – ..........

iv. शिष्य आचार्य को प्रणाम करें। – ..........

v. देशभक्त देश की रक्षा करें। – ..........

vi. सभी नृत्यांगनाएँ नृत्य करें। – ..........

vii. तुम घर जाओ। – ..........

viii. तुम दोनो संगीत का आनन्द लो।– ..........

ix. तुम सभी चुप रहो। – ..........

x. मैं भी दौड़ूँ। – ..........

**2. अधोलिखितवाक्यानां हिंदीभाषाया आंग्लभाषया स्वभाषया वा अनुवादं कुरुत–**

i. वृद्धः विश्रामं करोतु। – ..........

ii. कर्मकरौ कार्यं कुरुताम्। – ..........

iii. जनाः कर्मणि लग्नाः स्युः। – ..........

iv. त्वं विषयम् अवगच्छ। – ..........

v. युवां महापुरुषं नमतम्। – ..........

vi. यूयम् इतः धावथ। – ..........

vii. अहं पाठं स्मराणि। – ..........

viii. आवां स्पर्धायां भागं गृह्णीव। – ..........

© NCERT not to be republished

ix. वयं दीनानां सेवां कुर्याम – ..........

x. संङ्गीतज्ञा: गायन्तु – ..........

**3. उदाहरणमनुसृत्य वर्तमानकालस्य वाक्यानाम् आज्ञार्थकवाक्ये परिवर्तनं कुरुत–**

**यथा — वर्तमानकालिकवाक्यानि आज्ञार्थकवाक्यानि**

| | | |
|---|---|---|
| **स: गीतं गायति।** | – | **स: गीतं गायतु।** |
| **बालकौ तरत:।** | – | **बालकौ तरताम्।** |
| **शिष्या: नमन्ति।** | – | **शिष्या: नमन्तु।** |

i. चिकित्सक: उपचारं करोति। – ..........

ii. सेवकौ कार्याणि सम्पादयत:। – ..........

iii. सैनिका: देशं रक्षन्ति। – ..........

iv. जनक: सुतान् पालयति। – ..........

v. त्वं धनं प्रेषयसि। – ..........

vi. युवां गृहं गच्छथ:। – ..........

vii. यूयं पादकन्दुकं क्रीडथ। – ..........

viii. अहं वृक्षम् आरोहामि। – ..........

ix. आवां जल्पाव:। – ..........

x. वयम् अत्र उपदिशाम:। – ..........

**विध्यर्थे वाक्यप्रयोग: (विधिलिङ्लकारे वाक्यप्रयोग:)**

| | | |
|---|---|---|
| छात्र: ध्यानेन पठेत्। | – | *The student should read carefully.*<br>छात्र को ध्यान से पढ़ना चाहिए। |
| बालिके संगीतं शिक्षेताम्। | – | *Two girls should learn music.*<br>दो बालिकाओं को संगीत सीखना चाहिए। |
| भवन्त: कोलाहलं न कुर्यु:। | – | *You people should not make noise.*<br>आप लोग शोर न करें। |
| त्वं पाठं पठे:। | – | *You should read a lesson.*<br>तुम्हें पाठ पढ़ना चाहिए। |

© NCERT not to be republished

| | | |
|---|---|---|
| युवां श्लोकं वदेतम्। | – | *You both should recite a shloka.*<br>तुम दोनों को श्लोक पढ़ना चाहिए। |
| युवां शीघ्रं कार्यं समापयेतम्। | – | *You both should complete the work soon.*<br>तुम दोनों को कार्य शीघ्र समाप्त करना चाहिए। |
| अहं गृहं गच्छेयम्। | – | *I should go home.*<br>मुझे घर जाना चाहिए। |
| आवां लेखं लिखेव। | – | *We both should write an essay.*<br>हम दोनों को लेख लिखना चाहिए। |
| वयं भोजनं परिवेषयेम। | – | *We people should serve the meal.*<br>हम लोगों को भोजन परोसना चाहिए। |

## अभ्यासः

**1. अधोलिखितवाक्यानां हिंदीभाषया आंग्लभाषया स्वभाषया वा अनुवादं कुरुत–**

i. रमेश: कार्यं कुर्यात्। – ..........................................
ii. श्रमिक: पाषाणं त्रोटयेत्। – ..........................................
iii. सैनिक: देशं रक्षेत्। – ..........................................
iv. राधा जलं पिबेत्। – ..........................................
v. कवि: काव्यं कुर्यात्। – ..........................................
vi. नद्यौ वहेताम्। – ..........................................
vii. स्त्रिय: भोजनं पचेयु:। – ..........................................
viii. बालिका: चित्रं रचयेयु:। – ..........................................
ix. त्वं लेखनीं यच्छे:। – ..........................................
x. युवां समाधानं वदेतम्। – ..........................................
xi. यूयं कृपां प्रदर्शयेत। – ..........................................
xii. अहं भोजनं पचेयम्। – ..........................................



© NCERT not to be republished
Reprint 2025-26

xiii. आवां जलम् आनयेव। – ..........................................

xiv. वयं गृहकार्यं कुर्याम। – ..........................................

**2. अधोलिखितवाक्यानां संस्कृतभाषया अनुवादं कुरुत–**

i. हमें पर्यावरण की रक्षा करनी चाहिए। – ..........................................

ii. मुझे अपने भविष्य की चिंता करनी चाहिए। – ..........................................

iii. तुम्हें विज्ञान पढ़ना चाहिए। – ..........................................

iv. तुम दोनों को शिष्ट होना चाहिए। – ..........................................

v. तुम लोगों को दूध पीना चाहिए। – ..........................................

vi. सभी बच्चों को समय पर आना चाहिए।– ..........................................

vii. चिकित्सकों को ज्ञानी होना चाहिए। – ..........................................

viii. न्यायाधीश को न्याय करना चाहिए। – ..........................................

ix. छात्रों को कर्तव्यनिष्ठ होना चाहिए। – ..........................................

x. बच्चे को दौड़ना चाहिए। – ..........................................

xi. सभी को शाम को खेलना चाहिए। – ..........................................

xii. समय पर भोजन करना चाहिए। – ..........................................

xiii. मुझे पाठ याद करना चाहिए। – ..........................................

© NCERT not to be republished

6

0975CH06

# कारकोपपदविभक्तिः



**बालः** खेलति।

**बालौ** धावतः।



**बालाः** उपविशन्ति।



**महिलाः** वदन्ति।





**पुष्पाणि** विकसन्ति।

- उपरि यानि रेखाङ्कितानि पदानि सन्ति तानि कर्तृपदानि सन्ति।
- वाक्येषु कर्तृपदेषु प्रथमा विभक्तिः प्रयुज्यते।
- कर्तृपदस्य सम्बन्धः क्रियापदैः सह भवति।

© NCERT not to be republished

उदाहरणम् —

यदि कर्तृपदे एकवचनं तर्हि क्रियापदे अपि एकवचनं भवति। यथा —

**बाल: पठति।**

यदि कर्तृपदे द्विवचनं तर्हि क्रियापदे अपि द्विवचनं भवति। यथा-

**बालौ पठत:।**

यदि कर्तृपदे बहुवचनं तर्हि क्रियापदे अपि बहुवचनं भवति। यथा-

**बाला: पठन्ति ।**

- **लिङ्गपरिवर्तनेन क्रियापदानि न परिवर्तन्ते।**

यथा —

| **पु.** | **स्त्री.** | **नपुं.** |
|---|---|---|
| बालक: पठति | कन्या पठति। | मित्रम् पठति। |
| बालकौ पठत: | कन्ये पठत:। | मित्रे पठत:। |
| बालका:पठन्ति | कन्या: पठन्ति। | मित्राणि पठन्ति। |

## अभ्यास:

**1. उचितपदानि चित्वा रिक्तस्थानानि पूरयत —**

i. .................................... पठन्ति। (छात्रौ, छात्रा:)

ii. .................................... पाठयति। (अध्यापका:, अध्यापक:)

iii. .................................... पृच्छन्ति। (शिष्या:, शिष्यौ)

iv. .................................... वदत:। (बालौ, बाल:)

v. .................................... विकसन्ति। (पुष्पे, पुष्पाणि)

vi. .................................... पतति। (फलम्, फले)

**2. अधोलिखितम् अनुच्छेदं पठित्वा कर्तृपदानि चित्वा लिखत —**

वृक्षे अनेके खगा: वसन्ति। ते परस्परं प्रेम्णा व्यवहरन्ति। एकदा एक: वानर: तत्र आगच्छत्। स: शाखासु कूर्दते। खगा: दु:खिता: भवन्ति। ते न जानन्ति कथं अस्य प्रतिकार: कर्तव्य:। पुन: ते अचिन्तयन्-वयं मिलित्वा अस्य उपरि प्रहारं कुर्म:। तदा वानर: आगच्छत्। ते तस्य उपरि प्रहारम् अकुर्वन्। वानर: आहत: अभवत्। तत: परं स: कदापि तत्र न आगच्छत्।

© NCERT not to be republished



Reprint 2025-26

3. **उदाहरणानुसारं सार्थकं पदं लिखत—**

**यथा—**

i. [क: | शि | क्ष] **शिक्षक:**

ii. [नि | ला | फ] ..............................

iii. [वा | र: | न] ..............................

iv. [सु | शा | खा] ..............................

v. [क | चि | दा | त्] ..............................

4. **उदाहरणानुसारं शब्दरचनां कुरुत—**

**यथा—** वानर:




i. ..............................

ii. ..............................

iii. ..............................

iv. ..............................

v. ..............................

vi. ..............................

vii. ..............................

viii. ..............................

© NCERT not to be republished



Reprint 2025-26

# कर्मकारकम्



पुत्रः पुत्री च **जनकम्** अनुसरतः।

पिता **बालौ** कथयति।





अध्यापकः **बालान्** कथयति।

पिता **कन्यां** कथयति।





पुत्रि! पश्य तत्र **द्वे चटके** स्तः।

**रमा-** द्वे न तिस्रः (पिता तिस्रः **चटकाः** पश्यति।)





पुत्रः **जलम्** यच्छति।

© NCERT not to be republished



Reprint 2025-26

अम्बा **भोजनं** यच्छति



रमा तत्र त्रीणि **पात्राणि** स्थापयति।



- उपरि यानि रेखाङ्कितानि उदाहरणानि सन्ति तानि सर्वाणि द्वितीयाविभक्तौ सन्ति।

  यथा - जनकम्, बालौ, बालान्, कन्यां, चटके, चटका:, जलम्, भोजनम्, पात्राणि इत्यादीनि

**द्वितीयाविभक्ते: विशेषप्रयोग:**

- उभयत:, परित:, समया, निकषा, हा, प्रति, धिक् योगे द्वितीया।
- धातो: पूर्वं यदि उप, अनु, अधि उपसर्गा: स्यु: तत्रापि कर्मणि द्वितीया प्रयुज्यते।
- 'विना' योगे द्वितीया, तृतीया, पञ्चमी च प्रयुज्यते।

## अभ्यास:

**1. मञ्जूषाया: उचितं पदं चित्वा रिक्तस्थानानि पूरयत—**

(पुत्र: आगच्छति।)

अमित: – मात:! अतीव बुभुक्षा बाधते माम्। किं भोजनं सज्जम्?

अम्बा – आम् पुत्र! .................................................. कुरु।

अमित:– किं ..................................................?

अम्बा – तोरिका।

अमित:– अहो बहिर्गन्तव्यम्। विलम्ब: भवति। बुभुक्षा नास्ति।

अम्बा – (हसन्ती) 'तोरिका' इति कथने .................................................. समाप्ता किम्?

अमित:– (हसन्) एवं नास्ति मात:!



Reprint 2025-26

अम्बा – तर्हि ........................ कुत्र खादिष्यसि

अमित: – न जानामि।

अम्बा – तर्हि आगच्छ। उष्णं ........................ खाद।

अमित: – अस्तु, शीघ्रं खादित्वा गच्छामि।

**मञ्जूषा**

| रोटिकां, शाकं रोटिकां च, बुभुक्षा, पक्वम्, भोजनम् |
|---|

**2. उचितविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत—**

अङ्कुर: – अमित! मम ........................ परित: हरिता: वृक्षा: सन्ति। (गृह)

अमित:– अतिशोभनम्। मम ........................ उभयत: अवकरगृहम् अस्ति। (गृह)

अङ्कुर:– एतत् तु स्वास्थ्याय न उचितम्।

अमित: – जानीम: वयम्।

अङ्कुर:– ........................ विना तु जीवनं नरकायते। (स्वास्थ्य)

अमित: – धिक् एतादृशान् ........................ ये इतस्तत: अवकरं क्षिपन्ति। (जन)

**3. उचितविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत—**

i. महिला: ........................ गच्छन्ति। (उद्यान)

ii. तत्र ता: ........................ कुर्वन्ति। (व्यायाम)

iii. परस्परं ........................ च कुर्वन्ति। (वार्तालाप)

iv. ........................ च पश्यन्ति। (वृक्ष, पुष्प बहुव.)

v. ता: पुष्पाणां ........................ दृष्ट्वा प्रसीदन्ति (शोभा)

**4. उदाहरणानुसारं लिखत—**

| यथा- शब्द: | विभक्ति: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| जन | द्वितीया | जनम् | जनौ | जनान् |
| मनुष्य | .................. | .................. | .................. | .................. |



Reprint 2025-26

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| पुरुष | .................... | .................... | .................... | .................... |
| शाखा | द्वितीया | शाखाम् | शाखे | शाखाः |
| लता | .................... | .................... | .................... | .................... |
| जिह्वा | .................... | .................... | .................... | .................... |
| पत्र | द्वितीया | पत्रम् | पत्रे | पत्राणि |
| फल | .................... | .................... | .................... | .................... |
| पुष्प | .................... | .................... | .................... | .................... |

**5. कर्मकारकं द्वितीयाविभक्तिं च प्रयुज्य प्रदत्तम् उदाहरणम् अनुसृत्य पञ्च वाक्यानि लिखत।**

**उदाहरणम्** — 1. कौमुदी **संस्कृतं** पठति।

2. वत्सला **आम्रं** खादति।

1. ....................................................................................................
2. ....................................................................................................
3. ....................................................................................................
4. ....................................................................................................
5. ....................................................................................................

© NCERT not to be republished



Reprint 2025-26

# करणकारकम् (तृतीया-विभक्तिः)

**1. अधोलिखितानि उदाहरणानि पठत —**



**मेघैः** वर्षा भवति।



सरोवरः **कमलैः** भाति।



वृक्षः **पुष्पैः** शोभते।



उपवनं **वृक्षैः** शोभते।



वृक्षः **शाखाभिः** शोभते।



वानरः **कर्णाभ्याम्** बधिरः।

- उपरि यानि रेखाङ्कितपदानि सन्ति तानि करणकारके सन्ति।
- करणकारके तृतीयाविभक्तिः प्रयुज्यते।
- करणकारकस्य हिन्दीभाषायां चिह्नं भवति-से, के द्वारा।

© NCERT not to be republished

**2. अधोलिखितानि वाक्यानि पठत —**

| | |
|---|---|
| बन्दर आँख पर हाथ रखे। | स: **<u>नेत्राभ्याम्</u>** अन्ध:। |
| बन्दर के साथ मदारी | **<u>वानरेण</u>** सह क: अस्ति? |
| मदारी रस्सी दूर करता है। | **<u>रज्ज्वा</u>** किं प्रयोजनम्? |

- उपरिलिखितानि यानि रेखाङ्कितानि पदानि सन्ति तानि उपपदविभक्ते: सन्ति।
- अङ्गविकारे तृतीया-विभक्ति: प्रयुज्यते।
- सह-समम्-साकम्-सार्धम् एतेषां शब्दानाम् अर्थ: भवति 'साथ' एतेषां योगेऽपि तृतीया विभक्ति: प्रयुज्यते।

## अभ्यास:

**1. उचितपदेन रिक्तस्थानानि पूरयत —**

i. गृहे आनन्दमयं वातावरणं .................................... भवति। (बालै: , बालान्)

ii. विद्यालयस्य विद्यालयत्वं .................................... भवति। (छात्रान्, छात्रै:)

iii. रङ्गशालाया: शोभा .................................... भवति। (उत्सवान्, उत्सवै:)

iv. सभागारे जना: .................................... सह चर्चा कुर्वन्ति। (विदुषां, विद्वद्भि:)

**2. अधोलिखितश्लोकेभ्य: तृतीयाविभक्तियुक्तपदानि चित्वा लिखत-**

यथा —

सत्येन धार्यते पृथ्वी सत्येन तपते रवि:।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम्॥

| | | |
|---|---|---|
| सत्येन | सत्येन | सत्येन |

मनसा चिन्तितं कार्यं वाचा नैव प्रकाशयेत्॥
मन्त्रेण रक्षयेद् गूढं कार्ये चाऽपि नियोजयेत्।

| | | |
|---|---|---|
| | | |

© NCERT not to be republished



Reprint 2025-26

पुत्राश्च विविधैः शीलैर्नियोज्याः सततं बुधैः।
नीतिज्ञाः शीलसम्पन्ना भवन्ति कुलपूजिताः।

दरिद्रता धीरतया विराजते,
कुवस्त्रता शुभ्रतया विराजते।
कदन्नता चोष्णतया विराजते,
कुरूपता शीलतया विराजते।

**उदाहरणानुसारं लिखत—**

| **शब्दः** | **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|---|
| निर्धन | तृतीया | निर्धनेन | निर्धनाभ्याम् | निर्धनैः |
| जन | ...................... | ...................... | ...................... | ...................... |
| धनिक | ...................... | ...................... | ...................... | ...................... |
| शाखा | तृतीया | शाखया | शाखाभ्याम् | शाखाभिः |
| लता | ...................... | ...................... | ...................... | ...................... |
| रमा | ...................... | ...................... | ...................... | ...................... |

**4. कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत–**

i. पुत्रः ...................... सह गच्छति। (जनकस्य, जनकेन)

ii. सः जनः ...................... अन्धः तथापि पराश्रितः न अस्ति। (नेत्रयोः, नेत्राभ्याम्)

iii. ...................... हीनः पशुभिः समानः। (विद्यायाः, विद्यया)



© NCERT not to be republished

Reprint 2025-26

iv. ...................... किं प्रयोजनम्। (धनेन,धनात्)

v. सः ...................... बधिरः अस्ति। (कर्णाभ्याम्, कर्णेन)

**5. तृतीया-बहुवचनशब्दानां रचनां कुरुत—**




.............................. .............................. .............................. .............................. .............................. ...............

.............................. .............................. .............................. .............................. .............................. ...............

**6. करणकारकं तृतीयाविभक्तिं च प्रयुज्य प्रदत्तम् उदाहरणम् अनुसृत्य पञ्च वाक्यानि लिखत।**

**उदाहरणम्**— 1. गौतमी **कलमेन** लिखति।

2. काशिका यानेन गच्छति।

1. ..........................................................................................

2. ..........................................................................................

3. ..........................................................................................

4. ..........................................................................................

5. ..........................................................................................

© NCERT not to be republished



Reprint 2025-26

# सम्प्रदानकारकम् (चतुर्थी-विभक्तिः)

**1. अधोलिखितानि वाक्यानि पठत —**



बालः **पठनाय** गच्छति।



जनः **कार्यालयाय** गच्छति।



वृद्धः **भ्रमणाय** गच्छति।



वृद्धा **पूजनाय** गच्छति।



चिकित्सिका **उपचाराय** गच्छति।



कन्या **प्रार्थनायै** गच्छति।

© NCERT not to be republished



Reprint 2025-26

- उपरि यानि रेखाङ्कितपदानि सन्ति तानि सम्प्रदानकारके सन्ति। सम्प्रदानकारके चतुर्थी-विभक्तिः प्रयुज्यते।

**यथा — सः <u>पठनाय</u> गच्छति।**

**1. अधोलिखितानि वाक्यानि पठत —**



पिता **<u>बालकाय</u>** क्रुध्यति।



**<u>मह्यं</u>** रोटिका न रोचते।



**<u>इन्द्राय</u>** नमः।



**<u>अग्नये</u>** स्वाहा।



**<u>सर्वेभ्यः</u>** स्वस्ति।

उपरि यानि उदाहरणानि सन्ति तानि उपपदविभक्तेः सन्ति।

- क्रुध् - द्रुह् - ईर्ष्य् - असूय् आदि धातुकारणात् चतुर्थी प्रयुज्यते।
- रुच् कारणात् येभ्यः रोचते तस्मिन् चतुर्थी विभक्तिः प्रयुज्यते।
- नमः स्वस्ति-स्वाहा-स्वधा-अलं-वषट् कारणात् चतुर्थी - विभक्तिः प्रयुज्यते।

© NCERT not to be republished

## अभ्यास:

**1. कोष्ठकप्रदत्तपदै: सह उचितविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत—**

i. अद्य अधिकांशजना: शनिवासरे .................... बहि: गच्छन्ति। (मनोरजंन)

ii. ते रात्रौ बहि: ........................ गच्छन्ति। (भोजन)

iii. ........................ ते चिरकालात् पंक्तौ तिष्ठन्ति। (आहार)

iv. ........................सर्वे प्रशंसनीया: । (सत्कार्य)

v. स्व .................... किं किं कुरुते मानव: (प्रसन्नता)

**2. अधोलिखितशब्दान् उदाहरणानुसारं लिखत—**

| शब्द: | | | |
|---|---|---|---|
| श्रमिक: | श्रमिकाय | श्रमिकाभ्याम् | श्रमिकेभ्य: |
| जन: | .................... | .................... | .................... |
| लता | लतायै | लताभ्याम् | लताभ्य: |
| शाखा | .................... | .................... | .................... |
| पत्रम् | पत्राय | पत्राभ्याम् | पत्रेभ्य: |
| फलम् | .................... | .................... | .................... |
| कृषक: | .................... | .................... | .................... |
| रमा | .................... | .................... | .................... |
| पुष्पम् | .................... | .................... | .................... |

© NCERT not to be republished

**3. चतुर्थी-विभक्तियुक्तपदानि स्थूलरेखया चिह्नितानि कुरुत पृथक्तया लिखत च—**

i. विद्या विवादाय धनं मदाय ..............................

ii. शक्तिः परेषां परपीडनाय। ..............................

iii. खलस्य साधोर्विपरीतमेतत् ..............................

iv. ज्ञानाय दानाय च रक्षणाय॥ ..............................

**4. कोष्ठकात् उचितं पदं चित्वा लिखत—**

i. बालाः .............................. क्रीडाक्षेत्रं गच्छन्ति। (खेलनाय, खेलनस्य)

ii. सूदः .............................. पाकशालां गच्छति। (भोजनपाचनाय, भोजनपाचने)

iii. जनाः .............................. किं किं न कुर्वन्ति। (उदरपूरणाय, उदरपूरणे)

iv. कृषकः .............................. सर्वत्र प्रसिद्धः अस्ति। (परिश्रमे, परिश्रमाय)

v. कुक्कुरः .............................. इतस्ततः भ्रमति। (भोजनं, भोजनाय)

**5. घटात् चतुर्थी - विभक्तियुक्तपदानि चित्वा उचितकोष्ठके लिखत—**




| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. |

© NCERT not to be republished



Reprint 2025-26

# अपादानकारकम् (पंचमी-विभक्ति:)

**1. अधोलिखितानि वाक्यानि पठत—**



अश्वारोही **अश्वात्** पतति।



**लताया:** पुष्पाणि पतन्ति।



**वृक्षात्** पत्राणि पतन्ति।

**उपरि यानि रेखाङ्कितानि पदानि सन्ति तानि 'अपादानकारके' सन्ति। अपादानकारके 'पंचमीविभक्ति:' प्रयुज्यते**



गंगा **हिमालयात्** निस्सरति।



बाल: **अध्यापकात्** पठति।



© NCERT not to be republished

बालः **<u>अध्ययनात्</u>** प्रमाद्यति।



बाला **<u>विडालात्</u>** बिभेति।





बालकः **<u>गृहात्</u>** बहिःआगच्छति।

- उपरि यानि रेखाङ्कितानि पदानि सन्ति तानि पंचमी - उपपदविभक्तेः उदाहरणानि सन्ति।

## अभ्यासः

**1. कोष्ठके प्रदत्तशब्दैः सह उचितविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत।**

i. .................................. अङ्कुरः प्रभवति। (बीज)

ii. .................................. विद्युत् उद्भवति। (जल)

iii. .................................. छात्राः पठन्ति। (शिक्षक)

iv. .................................. नद्यः प्रभवन्ति। (पर्वत)

v. .................................. मा प्रमदः। (स्वाध्याय)

**2. पंचमीविभक्तियुक्तपदम् उदाहरणानुसारं चिह्नितं कुरुत-**

**यथा- <u>काष्ठात्</u> अग्निः जायते <u>मथ्यमानात्</u>।**

i. कीटः अपि सुमनः सङ्गात् आरोहति सतां शिरः।

ii. धैर्यात् कदाचित् स्थितिम् आप्नुयात् सः।



Reprint 2025-26

iii. विद्या ददाति विनयं विनयाद् याति पात्रताम्।
पात्रत्वाद् धनमाप्नोति धनाद् धर्मः ततः सुखम्।

iv. सत्यात् अपि हितं वदेत्।

v. दोषक्षयोऽग्निवृद्धिश्च व्यायामादुपजायते।

**3. उदाहरणानुसारं लिखत —**

| | शब्दः | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|
| यथा— | सैनिकः | पञ्चमी | सैनिकात् | सैनिकाभ्याम् | सैनिकेभ्यः |
| | रक्षकः | ........................ | ........................ | ........................ | ........................ |
| | मनुष्यः | ........................ | ........................ | ........................ | ........................ |
| | महिला | पञ्चमी | महिलायाः | महिलाभ्याम् | महिलाभ्यः |
| | देवी | ........................ | ........................ | ........................ | ........................ |
| | कन्या | ........................ | ........................ | ........................ | ........................ |
| | मित्रम् | पञ्चमी | मित्रात् | मित्राभ्याम् | मित्रेभ्यः |
| | पात्रम् | ........................ | ........................ | ........................ | ........................ |
| | गात्रम् | ........................ | ........................ | ........................ | ........................ |

**4. यथोचितं योजयत-**

| | | | |
|---|---|---|---|
| पिपीलिका | नरात् | ........................ | ........................ |
| देव | वृद्धायाः | ........................ | ........................ |
| सैनिक | मधुमक्षिकायाः | ........................ | ........................ |
| मधुमक्षिका | सैनिकात् | ........................ | ........................ |
| वृद्धा | देवात् | ........................ | ........................ |
| नर | पिपीलिकायाः | ........................ | ........................ |



© NCERT not to be republished

Reprint 2025-26

# सम्बन्धे (षष्ठीविभक्तिः)

**1. अधोलिखितानि वाक्यानि पठत—**

पश्यत। तत्र **वानरस्य** क्रीडा भवति।





सुन्दरं **मयूरस्य** नृत्यम्



**गजस्य** गतिः सुन्दरी।



**कोकिलस्य** गीतं सुन्दरम्।



**कपोतानां** सङ्घटनं प्रसिद्धम्।



**मृगस्य** स्वभावः मुग्धः।



**मधुमक्षिकायाः** स्वभावः मधुसञ्चयः

© NCERT not to be republished



Reprint 2025-26

- उपरि यानि रेखाङ्कितानि पदानि सन्ति तानि सर्वाणि षष्ठीविभक्तेः सन्ति।

**2. अधोलिखितानि वाक्यानि पठत —**

अन्नस्य हेतवे सः तत्र गच्छति।

वृक्षस्य उपरि खगानां निवासः अस्ति।

- उपरि यानि रेखाङ्कितानि पदानि सन्ति तानि उपपदविभक्तेः सन्ति।

हेतुः, उपरि आदि शब्दैः सह षष्ठी-विभक्तिः प्रयुज्यते।

## अभ्यासः

**1. कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत —**

i. बालः.................................अङ्के उपविशति। (पितुः,पित्रा)

ii. अद्य चिकित्सालयेषु ....................................सङ्ख्या प्रतिदिनं वर्धते। (रुग्णैः,रुग्णानाम्)

iii. वृक्षाः......................................आधारभूताः सन्ति। (पर्यावरणस्य, पर्यावरणेन)

iv. अद्यत्वे......................................जीवनं कष्टमयं जायते। (नगरात्, नगरस्य)

v. ..................................रक्षणाय वृक्षाणाम् आरोपणम् आवश्यकम्। (जीवनम्, जीवनस्य)

**2. षष्ठीविभक्तियुक्तपदानि चित्वा लिखत —**

i. महाजनस्य संसर्गः

कस्य नोन्नतिकारकः।

ii.

अभिवादनशीलस्य

नित्यं वृद्धोपसेविनः।

चत्वारि तस्य वर्धन्ते

आयुर्विद्या यशो बलम्।।

© NCERT not to be republished



Reprint 2025-26

iii. मानो हि महतां धनम्।

.............................................................................

iv. गच्छन् पिपीलको याति
योजनानां शतान्यपि।

v. नरस्याभरणं रूपं रूपस्याभरणं गुणः।
गुणस्याभरणं ज्ञानं ज्ञानस्याभरणं क्षमा।।

**3. उदाहरणानुसारं लिखत —**

| | नर | |
|---|---|---|
| नरस्य | नरयोः | नराणाम् |

| | क्षमा | |
|---|---|---|
| ............. | ............. | ............. |

| | वेद | |
|---|---|---|
| ............. | ............. | ............. |

| | नदी | |
|---|---|---|
| ............. | ............. | ............. |

| | तरु | |
|---|---|---|
| ............. | ............. | ............. |

| | विद्या | |
|---|---|---|
| ............. | ............. | ............. |

© NCERT not to be republished



Reprint 2025-26

**4. षष्ठीविभक्तियुक्तपदानां रचनां कुरुत-**




.......................... .......................... ..........................

.......................... .......................... ..........................

**याः-** लता, प्रज्ञा, सभा, रमा, क्षमा, विद्या




.......................... .......................... ..........................

.......................... .......................... ..........................

**5. प्रदत्तम् उदाहरणम् अनुसृत्य षष्ठीविभक्तिम् उपयुज्य पञ्च वाक्यानि लिखत।**

**उदाहरणम्** — 1. अहं **विद्यायाः महत्त्वं** जानामि।

2. **कृषकस्य क्षेत्रं हरितम्** अस्ति।

1. ..........................................................................................

2. ..........................................................................................

3. ..........................................................................................

4. ..........................................................................................

5. ..........................................................................................

© NCERT not to be republished



Reprint 2025-26

# अधिकरणकारकम् (सप्तमी–विभक्ति:)

**1. अधोलिखितानि वाक्यानि पठत —**



**आकाशे** चन्द्र: उदयति।



**नदीषु** अवकरं मा क्षिप।



**गृहे** कोऽपि नास्ति।



माता **कन्यायां** स्निह्यति।

- उपरि यानि रेखाङ्कितानि पदानि तानि अधिकरणकारके सन्ति।
- अधिकरणकारके सप्तमी-विभक्ति: प्रयुज्यते। यथा वृक्षेषु खगा: वसन्ति।

**1. अधोलिखितानि वाक्यानि पठत —**

अमित: **बालकानां/बालेषु** श्रेष्ठ: अस्ति।

बाल: **अम्बायां** स्निह्यति ।

अद्य बाला: **मित्रेषु** विश्वसन्ति ।

- उपरि यानि रेखाङ्कतानि पदानि सन्ति तानि सप्तमी-विभक्तौ सन्ति।
- स्निह्, वि+श्वस्, श्रेष्ठ एतेषां योगे सप्तमीविभक्ते: प्रयोग: भवति।



Reprint 2025-26

## अभ्यास:

**1. कोष्ठकात् उचितं पदं चित्वा लिखत —**

i. अद्य तु .................................... अपि वृक्षा: न सन्ति। (पर्वतीयस्थलम्, पर्वतीयस्थले)

ii. चाणक्यो ब्रवीति .................................... अपि विश्वास: न कर्तव्य:। (मित्राय/मित्रे)

iii. कृष्ण: .................................... स्निह्यति (गोषु/गवम्)

iv. अद्य बाला: चलदूरभाषस्य .................................... रता: भवन्ति। (प्रयोगे, प्रयोगस्य)

v. .................................... रक्षाया: विषये जागरूका: भवेयु:। (पर्यावरणस्य,पर्यावरणे)

**2. सप्तमीविभक्तियुक्तपदानि चित्वा लिखत —**

i. उत्सवे व्यसने चैव
दुर्भिक्षे शत्रुविग्रहे।
राजद्वारे श्मशाने च,
यस्तिष्ठति स बान्धव:।।



© NCERT not to be republished



Reprint 2025-26

ii. परोक्षे कार्यहन्तारम्,
प्रत्यक्षे प्रियवादिनम्।
वर्जयेत् तादृशं मित्रम्,
विषकुम्भं पयोमुखम्।।

...................... ......................

iii. न कूपखननं युक्तं
प्रदीप्ते वह्निना गृहे।

...................... ......................

iv. सत्यमेवेश्वरो लोके
सत्ये धर्मः समाश्रितः।

...................... ......................

**3. उदाहरणमनुसृत्य अधोलिखितान् कोष्ठकान् यथायोग्यपदैः पूरयत —**

| | | | |
|---|---|---|---|
| **यथा जन** | जने | जनयोः | जनेषु |
| विद्वस् | .............. | .............. | .............. |
| आत्मन् | .............. | .............. | .............. |

© NCERT not to be republished

| | | | |
|---|---|---|---|
| राजन् | | | |
| क्षमा | | | |
| नदी | | | |

**4. अधिकरणकारकं सप्तमीविभक्तिं च उपयुज्य प्रदत्तम् उदाहरणम् अनुसृत्य पञ्च वाक्यानि लिखत।**

**उदाहरणम्** — 1. **जले** मत्स्या: सन्तरन्ति।

2. **लतायां** पुष्पाणि सन्ति

1. ..........
2. ..........
3. ..........
4. ..........
5. ..........

© NCERT not to be republished



Reprint 2025-26

# सम्बोधनम्

**1. अधोलिखितानि वाक्यानि पठत-**



**हे मेघ,** वर्षां कुरु।

**हे इन्द्रदेव,** वर्षय अधुना।





हे **मेघ,** प्रसन्नोऽस्मि।

- एतानि रेखाङ्कितपदानि सम्बोधने सन्ति।
- सम्बोधने प्रथमा विभक्ति: प्रयुज्यते।
- सम्बोधने केवलं प्रथमाया: एकवचने परिवर्तनं भवति।
- सम्बोधने एकवचने विसर्गस्य लोप: भवति।
- सम्बोधने द्विवचनस्य बहुवचनस्य च रूपाणि प्रथमाविभक्तिवत् प्रचलन्ति।
- सामान्यतया कुत्रचित् सर्वेषाम् पदानाम् अन्ते ‘,’ इति चिह्नस्य प्रयोग: भवति।

© NCERT not to be republished



Reprint 2025-26

7

0975CH07

# सन्धिः

**अस्माभिः पठितं यत् वर्णानां संयोजनेन शब्दरचना भवति। क्वचित् क्वचिद् वर्णसंयोजनेन वर्णरूपेषु परिवर्तनमपि जायते।**

**यथा —**

| | | | |
|---|---|---|---|
| सूर्य + आतपे | = | सूर्यातपे | स्वर-सन्धिः |
| प्रत्यवदत् | = | प्रति + अवदत् | |
| तत् + अनन्तरम् | = | तदनन्तरम् | व्यञ्जन-सन्धिः |
| तस्मिन्नेव | = | तस्मिन् + एव | |
| तस्याः + च | = | तस्याश्च | विसर्ग-सन्धिः |
| नृपोऽवदत् | = | नृपः + अवदत् | |

**एतत् वर्णपरिवर्तनमेव सन्धिः, वरिवर्तितवर्णानां मूलरूपेषु पुनः आनयनं च सन्धिविच्छेदः। अधुना विस्तरेण जानीम : —**

**1. उदाहरणमनुसृत्य सन्धिं विच्छेदं वा कुरुत —**

**(क)** अ, आ + अ, आ = आ

i. सूर्य + आतपे = सूर्यातपे (अ+आ=आ)

ii. लोभ + आविष्टा = ...................... (......................)

iii. आगतास्ति = ...................... + ...................... (......................)

iv. एव + अस्य = ...................... (......................)

v. पूर्वार्द्धः ...................... = ...................... (......................)

**(ख)** इ, ई + इ, ई = ई

i. अति + इव = अतीव (इ+इ=ई)

ii. नदी + इयम् = ...................... (......................)

iii. कपि + ईदृशः = ...................... (......................)

© NCERT not to be republished

iv. लघ्वीति = .................... + .................... (....................)

v. कपीन्द्रः = .................... + .................... (....................)

**(ग)** उ, ऊ + उ, ऊ = ऊ

i. गुरु + उचितम् = गुरूचितम् (उ+उ=ऊ)

ii. भानु + उदयः = .................... (....................)

iii. लघूर्मिः .................... + .................... (....................)

iv. भू + ऊर्ध्वम् = .................... (....................)

v. साधूपदेशः = .................... + .................... (....................)

**(घ)** ऋ, ॠ + ऋ, ॠ = ॠ

i. पितृ + ऋणम् = पितॄणम् (ऋ+ऋ=ॠ)

ii. मातृ + ऋद्धिः = .................... (....................)

iii. भ्रातॄणम् .................... + .................... (....................)

‘अकः सवर्णे दीर्घः’, इति सूत्रेण समान-स्वरवर्णयोः दीर्घादेशः भवति।
एषः ‘दीर्घसन्धिः’ इति कथ्यते।

**2. उदाहरणमनुसृत्य सन्धिं विच्छेदं वा कुरुत —**

**(क)** अ, आ + इ, ई = ए

i. अनेन + इति = अनेनेति (अ+इ=ए)

ii. यथा + इच्छया= .................... (....................)

iii. मातेव = .................... + .................... (....................)

iv. लतेयम् = .................... + .................... (....................)

**(ख)** अ, आ + उ, ऊ = ओ

i. वृक्षस्य + उपरि= वृक्षस्योपरि (अ+उ=ओ)

ii. सूर्योदयात् = .................... + .................... (....................)

iii. घृत+ उत्पत्तिः = .................... (....................)

iv. मानवोचितम् = .................... + .................... (....................)

v. गृह + उद्यानम् = .................... (....................)



© NCERT not to be republished

Reprint 2025-26

**(ग)** अ, आ + ऋ, ॠ = अर्

i. महा + ऋषि: = महर्षि: (आ+ऋ=अर्)

ii. देवर्षि: = ........................ + ........................ (........................)

iii. वसन्त + ऋतु:= ........................ (........................)

iv. वर्षर्तु: = ........................ + ........................ (........................)

'आद् गुण:' इति सूत्रेण अ-आ-वर्णयो:, इ,ई उ,ऊ/ऋ, ॠ वर्णाभ्यां सह मेलनेन क्रमश:-ऐ, ओ, अर् इति भवन्ति। एष: गुणसन्धि: इति कथ्यते।

**3. यथापेक्षितं सन्धिं विच्छेदं वा कुरुत —**

**(क)** अ, आ + ए, ऐ = ऐ

i. गत्वा + एव = गत्वैव (आ+ए=ऐ)

ii. एव + एनम् = ........................ (........................)

iii. क्षणेनैव = ........................ + ........................ (........................)

iv. न + एतादृश: = ........................ (........................)

v. महैरावत: = ........................ + ........................ (........................)

**(ख)** अ, आ + ओ, औ = औ

i. जल + ओघ: = जलौघ: (अ+ओ=औ)

ii. तव + औदार्यम्= ........................ (........................)

iii. वनौषधि: = ........................ + ........................ (........................)

iv. महा + औत्सुक्येन= ........................ (........................)

v. जनौघ: = ........................ + ........................ (........................)

**'वृद्धिरेचि' इति सूत्रानुसारेण अ,आ वर्णयो: क्रमश: ए, ऐ/ओ, औ वर्णाभ्याम् सह मेलने जाते क्रमश: 'ऐ', 'औ' इति भवति। एष: 'वृद्धिसन्धि:' इति कथ्यते।**



© NCERT not to be republished







अधिकारः (अधि + ..................)

अधिगमः (अधि + ..................)

अधिकरणम् (.................. + करणम्)

अधिरोहति (.................. + रोहति)

आचारः (आ + ..................)

आधारः (आ + ..................)

आहारः (आ + ..................)

आगमनम् (आ + ..................)

**4. उदाहरणमनुसृत्य सन्धिं विच्छेदं वा कुरुत—**

**(क)** इ, ई + असमान-स्वरः= इ, ई स्थाने य् + स्वरः

i. प्रति + अवदत्= प्रत्यवदत् (इ+अ=य)

ii. यदि + अहम् = .................. (..................)

iii. तानि + एव = .................. (..................)

iv. पर्यावरणम् = .................. + .................. (..................)

v. इत्यवदत् = .................. + .................. (..................)

**(ख)** उ, ऊ + असमानः स्वरः= उ, ऊ स्थाने व् + स्वरः

i. खलु + अयम् = खल्वयम् (उ+अ=व)

ii. मधु + अरिः = .................. (..................)

iii. गुणेष्वेव = .................. (..................)

iv. विरमन्तु + एते = .................. + .................. (..................)

v. स्वागतम् = .................. + .................. (..................)

**(ग)** ऋ, ॠ + असमान-स्वरः= ऋ स्थाने र् + स्वरः

i. पितृ+ आदेशः= पित्रादेशः (ऋ+आ=रा)

© NCERT not to be republished

ii. मात्राज्ञा = .................... + .................... (....................)

iii. भ्रातृ + इच्छा = .................... (....................)

iv. कर्तृ + उपदेशः = .................... (....................)

v. पित्रनुमतिः = .................... + .................... (....................)

**'इको यणचि' सूत्रानुसारम् इ, ई/उ, ऊ/ ऋ, ॠ स्वराणाम् असमानस्वरेण सह मेलनेन इ, ई/उ,ऊ/ऋ, ॠ वर्णानां स्थाने क्रमशः य्, व्, र् इति भवन्ति, परवर्ती स्वरः च एतैः सह मात्रारूपेण प्रयुज्यते।**

**5. उदाहरणमनुसृत्य सन्धिं विच्छेदं वा कुरुत —**

**(क)** म् + व्यञ्जनवर्णः = म् स्थाने अनुस्वारः
म् + स्वरः = म् वर्णे स्वरस्य संयोगः

i. त्वम् + यासि = त्वं यासि (संधिः)

ii. अहम् + इच्छामि = .................... (....................)

iii. किम्+ कथयति = .................... (....................)

iv. अयम् + राजा = .................... (....................)

v. माम् + मुञ्च = .................... (....................)

vi. कथमागतः = .................... + .................... (....................)

vii. अयम् +राजा = .................... (....................)

viii. हर्तुम् +इच्छति = .................... (....................)

ix. सन्ध्याम् + यावत् = .................... (....................)

'मोऽनुस्वारः' इति सूत्रानुसारं 'म्' इति वर्णस्य पश्चात् यदि कोऽपि व्यञ्जनवर्णः भवति तर्हि 'म्' वर्णस्य स्थाने अनुस्वारः भवति।

© NCERT not to be republished

## अभ्यासः

**1. प्रदत्त-पदेषु सन्धिं विच्छेदं वा कुरुत —**

i. हिताहितम् = ........................ + ........................
ii. पश्चिमोत्तरम् = ........................ + ........................
iii. वृथा + अटनम् = ........................
iv. इति + उभौ = ........................
v. नमाम्येनम् = ........................ + ........................
vi. वृकोदरेण = ........................ + ........................
vii. राजमार्गेण + एव= ........................
viii. इहागतः = ........................ + ........................
ix. पूर्व + इतरम् = ........................
x. वदतीति = ........................ + ........................
xi. तव + औषधम् = ........................
xii. राजर्षिः = ........................ + ........................
xiii. अत्रान्तरम् = ........................ + ........................
xiv. अहम् + गच्छामि = ........................
xv. खलु + एषः = ........................
xvi. साधूक्तम् = ........................ + ........................
xvii. मातृ + ऋणम् = ........................



© NCERT not to be republished

Reprint 2025-26

# 8

0975CH08

# उपसर्गाव्ययप्रत्ययाः




उपरि वयं पश्यामः यत् 'हारः' इति पदस्य भिन्नैः उपसर्गैः सह संयोगे जाते अर्थपरिवर्तनमपि सञ्जातम्। उपसर्ग-विषये उच्यते—

**"उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।**
**प्रहाराहार-संहार-विहार-परिहारवत्।।"**

उपसर्ग-विषये ज्ञातव्यम् यत्—

- उपसर्गः शब्दात् धातोः च पूर्वं भवति।
- उपसर्गेण कदाचित् अर्थे परिवर्तनं कदाचिच्च अर्थस्य पोषणं भवति।
- कदाचित् एकस्मिन् शब्दे द्वित्राः उपसर्गाः अपि भवन्ति।

© NCERT not to be republished

**1. उपसर्गान् संयोज्य पदरचनां कुरुत—**




विशेष: (वि + शेष:)
विकार: (वि + कार:)
विहार: (वि + हार:)
विवाद: (वि + वाद:)




सुगन्ध: (सु + गन्ध:)
सुकन्या (सु + कन्या)
सुबुद्धि: (सु + बुद्धि:)
सुदर्शन (.................. + ..................)




अपमान: (अप + मान:)
अपयश:(.................. + ..................)
अपकार: (अप + कार:)




दुर्दशा (.................. + ..................)
दुर्बुद्धि: (दुर्+ बुद्धि:)
दुर्जन: (.................. + ..................)
दुराचारी (दुर् + आचारी)

© NCERT
not to be republished



Reprint 2025-26

**2. उपसर्गं संयोज्य उचितैः धातुरूपैः रिक्तस्थानानि पूरयत—**

i. गङ्गा हिमालयात् .................................... । (निस् + सृ, लट्)

ii. कृषकाः क्षेत्रात् .................................... । (आ+गम्, लङ्)

iii. वयं नियमान् ....................................। (परि + पाल्, लट्)

iv. छात्राः गुरौ आगते ....................................। (उत्+स्था, लोट्)

v. विडालः मूषकम् ....................................। (अनु+सृ, लट्)

vi. त्वं कक्षायां पाठं ध्यानेन....................................। (अव + गम्, विधि.)

vii. बीजात् वृक्षः ....................................। (उद्+भू, लृट्)

viii. सेवकाः स्वामिनम् ....................................। (उप+सेव्+लट्)

ix. अद्याहं शीतं न ....................................। (अनु+भू+लट्)

**3. उचितैः उपसर्गयुक्तैः पदैः रिक्तस्थानानि पूरयत—**

i. एषः मार्गः अतीव ....................................। (दुर् + गमः)

ii. कस्यापि अवगुणस्य .................................... मा कुरु। (उत् + लेखम्)

iii. ....................................अपि....................................न करणीयः। (निर् + धनस्य, अप+मानः)

iv. तव एतावत्....................................यत् मम् ....................................करोषि (दुस् + साहसम्, अप्+मानम्)

v. क्षम्यताम्,.................................... अहं तव.................................... करोमि। (निस्+सन्देहम्, सम्+मानम्)

vi. लोकस्य ....................................एव श्रेयस्करम् । (सम्+रक्षणम्)

# अव्ययपदानि

| अव्ययपद | अर्थ | अव्ययपद | अर्थ |
|---|---|---|---|
| अभित: | दोनों ओर | यथा-तथा | जैसे-तैसे |
| परित: | चारों ओर | यदा-तदा | जब-तब |
| उभयत: | दोनों ओर | यत्र-तत्र | जहाँ-वहाँ |
| सर्वत: | सब ओर | उपरि-अध: | ऊपर-नीचे |
| समन्तत: | चारों ओर | | |
| अधुना | अब | श्व: | (आने वाला कल) |
| | | ह्य: | (बीता हुआ कल) |
| सम्प्रति | अब | चेत् | यदि, तो |
| इदानीं | अब | उच्चै:-नीचै: | ऊपर-नीचे |
| यावत् | जब तक | सर्वत्र | सब ओर |
| तावत् | तब तक | कुत्र | कहाँ |
| सदा | हमेशा | एकत्र | एक स्थान |
| सततम् | हमेशा | कथम् | क्यों, कैसे |
| शनै:-शनै: | धीरे-धीरे | कथञ्चित् | जैसे-तैसे |
| भूयो भूय: | बार-बार | कुत: | कहाँ से |
| मुहुर्मुहु: | बार-बार | अजस्रम् | निरंतर |
| असकृत् | बार-बार | नूनम् | निश्चय ही |
| सहसा | अचानक | खलु | निश्चय ही |
| अकस्मात् | अचानक | किल | निश्चय ही |
| सद्य: | तुरन्त | एवमेव | ऐसा ही |
| सपदि | तुरन्त | ध्रुवम् | अवश्य |
| झटिति/शीघ्रं | तुरन्त | किञ्चन | कुछ |
| एकदा | एकबार | किञ्चित् | कुछ |
| सकृत् | एकबार | केवलम् | केवल |
| अचिरात् | अभी | ईषत् | थोड़ा सा |
| अचिरेण | अभी | तूष्णीम् | चुपचाप |



© NCERT not to be republished

Reprint 2025-26

| | | | |
|---|---|---|---|
| अचिरम् | अभी | मा | मत |
| अपरम् | और भी | न | नही |
| च | और | | |
| अथ किम् | हाँ, और क्या | ऋते | बिना |
| कदाचित् | कभी, किसी समय | समया | समीप |
| पुरा | प्राचीन काल में | निकषा | समीप |
| अपि | भी | अन्यथा | अन्यथा |
| वृथा | व्यर्थ | | |

**1. निम्नलिखितानाम् अव्ययानां रिक्तस्थानेषु प्रयोगं कुरुत —**

**सहसा, अपि, सर्वदा, यदा, अचिरम्, श्वः, ह्यः, इदानीम्, तदा**

i. ........................................ निर्णयः न करणीयः।

ii. ........................................ गृहम् गच्छ।

iii. अहम् ........................................ वाराणसीं गमिष्यामि।

iv. ........................................ प्रातः भ्रमणं कुर्यात्।

v. ........................................ मम गृहे उत्सवः आसीत्।

vi. ........................................ अहं संस्कृतं पठामि।

vii. त्वं किम् ........................................ गच्छसि?

viii. ........................................ अहम् गमिष्यामि ........................................ सः अत्र आगमिष्यति।

**2. अधोलिखितेषु वाक्येषु अव्ययपदानि प्रयुक्तानि तानि पदानि चित्वा यथास्थानं लिखत—**

i. यावत् परीक्षाकालः नायाति तावत् परिश्रमं कुरु।

........................................................................................................

ii. कालः वृथा न यापनीयः।

........................................................................................................

iii. अहं सम्प्रति गृहं गन्तुम् इच्छामि।

........................................................................................................

© NCERT not to be republished



Reprint 2025-26

iv. यत्र-यत्र धूमः तत्र-तत्र अग्निः सम्भाव्यते।

..........................................................................................

v. पुरा अशोकः नाम राजा आसीत्।

..........................................................................................

vi. शीघ्रं कार्यं समापय अन्यथा विलम्बः भविष्यति।

..........................................................................................

vii. अद्य प्रभृति अहं धूमपानं न करिष्यामि।

..........................................................................................

viii. ईषत् हसित्वा सः तस्य उपहासं कृतवान्।

..........................................................................................

ix. सः मुहुर्मुहुः किम् पश्यति?

..........................................................................................

x. अहम् त्वाम् भूयो भूयः नमामि।

..........................................................................................

**3. कोष्ठकेभ्यः शुद्धम् अव्ययपदं चित्वा रिक्तस्थानं पूरयत —**

i. अहं श्वः भ्रमणाय.......................................... गमिष्यामि। (विना/ध्रुवम्)
ii. विद्यालयम् .......................................... उद्यानमस्ति। (समन्ततः/अन्यत्र)
iii. .......................................... वद। (उच्चैः/नीचैः)
iv. .......................................... सः पुस्तकं पठति। (अधुना/पुरा)
v. त्वम् .......................................... गच्छसि? (कुत्र/एकत्र)
vi. कोलाहलं .......................................... कुरु। (मा/एव)
vii. अध्यापकं दृष्ट्वा छात्रः .......................................... स्थितः। (तूष्णीं/मुखरः)
viii. सुरेशः आपणं गच्छति .......................................... च मित्रेण सह क्रीडिष्यति।(अपि/अपरम्)



© NCERT not to be republished

Reprint 2025-26

**4. निम्नलिखित-अव्ययपदानां रिक्तस्थानेषु प्रयोगं कुरुत-**

**कुतः, सहसा, नूनम्, यदि-तर्हि, प्रायः, अद्य, चिरम्, अथ, सर्वत्र, सदा**

i. भवान् ........................ आगतः?

ii. ........................ पिपासा अस्ति ........................ जलं पिबतु।

iii. प्रज्ञा ........................आगच्छति।

iv. ........................ जनाः साक्षराः सन्ति।

v. ........................ अद्य वर्षा भविष्यति।

vi. ........................ सोमवासरः अस्ति।

vii. पुष्पं ........................ गन्धयति।

viii. ........................ कथा प्रारभ्यते।

ix. ईश्वरः ........................ अस्ति।

x. माता पुत्री च ........................ नृत्यतः।

**योग्यता-विस्तार** —

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।।

अव्ययपदस्य रूपपरिवर्तनं न भवति।

त्रिषु लिङ्गेषु समानं रूपम्।

सप्तसु विभक्तिषु समानं रूपम्।

त्रिषु वचनेषु समानं रूपम्।

© NCERT not to be republished



Reprint 2025-26

# प्रत्यया:

## कृत्प्रत्यया:




अत्र वयं पश्याम: यत् पठ्-धातो प्रयोग: विभिन्नेषु अर्थेषु भवति। अर्थस्य एषा विभिन्नता प्रत्ययानां प्रयोगेण सम्भवति। उपसर्गा: शब्देभ्य: धातुभ्य: वा पूर्वं संयुज्य अर्थपरिवर्तनं कुर्वन्ति, प्रत्ययाश्च शब्देभ्य: धातुभ्य: वा पश्चात् संयुज्य अर्थ-विस्तारं कुर्वन्ति।

### क्त्वा-प्रत्यय:

(वाक्य में मुख्य क्रिया से पूर्व किए गए कार्य में पूर्वकालिक क्रिया को व्यक्त करने के लिए धातु में क्त्वा प्रत्यय का योग किया जाता है।)

यथा— बाल: आपणं **गत्वा** फलानि आनयत्। (गम् + क्त्वा = गत्वा)

© NCERT not to be republished



Reprint 2025-26

**अध: प्रदत्त-वाक्यानि पठन्तु —**

स: बहि: **दृष्ट्वा** आगच्छति। (दृश् + क्त्वा)

रमेश: मित्रं **स्पृष्ट्वा** अधावत्। (स्पृश् + क्त्वा)

स: दुग्धं **पीत्वा** शयनं करोति। (पा + क्त्वा)

गुरुं **पृष्ट्वा** एव कक्षाया: बहिर्गच्छ। (प्रच्छ् + क्त्वा)

अत्र **गत्वा, दृष्ट्वा, स्पृष्ट्वा, पीत्वा, पृष्ट्वा** इति शब्देषु **'क्त्वा'** प्रत्ययस्य प्रयोग: अस्ति। एकेन कर्त्रा यदा एकं कार्यं सम्पाद्य अन्यत् कार्यं क्रियते तदा प्रथमक्रियायामस्य प्रत्ययस्य प्रयोग: भवति।

**1. कोष्ठके प्रदत्तधातुषु क्त्वाप्रत्ययप्रयोगेण रिक्तस्थानानि पूरयत-**

i. राम: रावणं ........................................ सीतां प्राप्नोत्। (हन्)

ii. प्रश्नस्य उत्तरं ........................................ छात्र: प्रसीदति। (ज्ञा)

iii. सीता गीतायै पुस्तकं ........................................ गच्छति। (दा)

iv. सा कथां ........................................ श्रावयति। (लिख्)

v. श्रोतार: कथां ........................................ प्रसन्ना: भवन्ति। (श्रु)

vi. बाला: ........................................ आगच्छन्ति। (धाव्)

vii. पुष्पं ........................................ प्रसीदाम:। (घ्रा)

viii. गायक: गीतं ........................................ संतुष्टिं प्राप्नोति। (गै)

**ल्यप् प्रत्यय:**

(पूर्वकालिक क्रिया के अर्थ में ल्यप् प्रत्यय का भी प्रयोग होता है। जहाँ धातु से पूर्व कोई उपसर्ग लगा होता है वहाँ क्त्वा के स्थान पर ल्यप् प्रत्यय का प्रयोग किया जाता है।

यथा — स: गुरुं **प्रणम्य** कक्षां गच्छति।

**2. अधुना एतानि वाक्यानि पठन्तु भेदं चावगच्छन्तु —**

बाल: पितरम् **अनुगम्य** कार्यं करोति। (अनु + गम् + ल्यप्)

अहं कार्यं **समाप्य** एव गमिष्यामि। (सम् + आप्+ ल्यप्)

त्वम् वृक्षम् **आरुह्य** किं करोषि? (आ + रुह् + ल्यप्)

महोदये! वृक्षात् फलं **प्राप्य** तुष्टो भवामि। एतेषु वाक्येष्वपि एकं कार्यं कृत्वा एवापरं कार्यं क्रियते परं यदा वयं ध्यानेन एतानि वाक्यानि पठाम: तदा स्पष्टं भवति यदत्र **क्त्वा-स्थाने** ल्यप्



© NCERT not to be republished

Reprint 2025-26

प्रत्ययस्य प्रयोगः अस्ति, यतः अत्र धातूनां प्रयोगः उपसर्गेण सह कृतः। अतः अत्र क्त्वास्थाने ल्यप्प्रत्ययः अस्ति। अधुना प्रकृति-प्रत्यय-विभागेन विस्तरेण अवगच्छामः —

| यथा — | **प्रकृतिः** | **प्रत्ययः** |
|---|---|---|
| अनुगम्य | अनु+ गम् | ल्यप् |
| i. प्रणम्य | प्र+नम् | .................. |
| ii. .................. | सम्+आप् | ल्यप् |
| iii. आरुह्य | ..................+.................. | .................. |
| iv. आदाय | ..................+.................. | ल्यप् |

**3. समुचितप्रत्यय-प्रयोगेण वाक्यानि पूरयत —**

**छात्रः कक्षायाम् .................. (उत्थाय/उत्थात्वा) प्रश्नं पृच्छति। शिक्षकः उत्तरम् .................. (प्रदात्वा/प्रदाय) तं सन्तोषयति। छात्रः उत्तरं .................. (ज्ञात्वा/ज्ञाय) प्रसन्नः भवति। सन्तुष्टः .................. (भूत्वा/भवित्वा) पाठं च सम्यक् ..................(अवगत्वा/अवगत्य) गृहं गच्छति।**

## तुमुन्

[निमित्तार्थक के लिए अर्थात् क्रिया को करने के लिए धातु के साथ तुमुन् प्रत्यय लगता है।]

यथा— बालकः नाटकं **द्रष्टुम्** गच्छति। (दृश् + तुमुन्)

**4. अधुना एतानि वाक्यानि पठन्तु-**

अहं जलं **पातुम्** इच्छामि। (पा + तुमुन्)

मयूरः **नर्तितुम्** स्वपक्षान् उद्घाटयति। (नृत् + तुमुन्)

विद्यालयं **गन्तुम्** छात्राः सज्जाः सन्ति। (गम् + तुमुन्)

पिता पुत्राय पुस्तकानि **क्रेतुम्** आपणं गच्छति। (क्री + तुमुन्)

अत्र **द्रष्टुम्, पातुम्, नर्तितुम्, गन्तुम्, क्रेतुम्,** इति शब्देषु 'तुमुन्' प्रत्ययस्य प्रयोगः अस्ति। प्रायशः चतुर्थीविभक्तयर्थे 'तुमुन्' प्रत्ययस्य प्रयोगः भवति।

**उपरि प्रयुक्तानां तुमुन्-प्रत्ययान्तपदानां प्रकृति-प्रत्यय-विभागं कृत्वा लिखत-**

i. द्रष्टुम्- .................. + ..................

ii. पातुम्- .................. + ..................

iii. नर्तितुम्- .................. + ..................



Reprint 2025-26

© NCERT not to be republished

iv. गन्तुम्- ................ + ................

v. क्रेतुम्- ................+................

**2. अधुना कोष्ठके प्रदत्तधातुषु तुमुन्-प्रत्ययस्य योगेन रिक्तस्थानानि पूरयत-**

**एक: चौर: एकस्मिन् गृहे चौर्यं कृत्वा ................ (धाव्) इच्छति। गृहस्वामी तं दृष्ट्वा तं ................ (गृह्) धावति। मार्गे एक: वत्स: धेनो: क्षीरं ................ (पा) तिष्ठति। छात्रा: अपि ................ (पठ्) विद्यालयं गच्छन्ति स्म। अत: जनसम्मर्दे धेनुना आहत: चौर: आत्मानं ................ (रक्ष्) असमर्थ: अभवत्। अत: गृहस्वामी जनै: सह चौरं ................(बन्ध्) समर्थ: अभवत्।**

**शतृ-प्रत्यय:**

(एक कार्य को करते हुए जब अन्य कार्य भी किया जा रहा हो तो परस्मैपदी धातु के साथ शतृ प्रत्यय तथा आत्मनेपदी धातुओ में शानच् प्रत्यय का प्रयोग किया जाता है।)

यथा— 1. **गायन्ती** बालिका नृत्यति। (गै+ शतृ+ स्त्री.)

2. **मोदमान:** बालक: पित्रे अङ्कसूचीं प्रदर्शयति। (मुद् + शानच्)

**1. अध:प्रदत्तानि वाक्यानि ध्यानेन पठन्तु —**

**गच्छन्** बालक: अपतत्। (गम्+ शतृ)

**रुदन्तं** बालकं रोदनस्य कारणं पृच्छ। (रुद् + शतृ)

कथां **कथयता** कथावाचकेन अद्य का कथा श्राविता? (कत् + शतृ + तृतीया विभक्ति)

**हसत:** बालकस्य नाम किम् अस्ति? (हस् + शतृ + षष्ठी)

एतेषु वाक्येषु गायन्ती, गच्छन्, रुदन्तम्, कथयता, हसत: इत्येता: क्रिया: अपूर्णा: सन्ति परं नृत्यति, अपतत्, पृच्छ, श्राविता, अस्ति इत्यादिभि: क्रियाभि: वाक्यानि पूर्णतां प्राप्नुवन्ति। वाक्ये शतृप्रत्यययुक्त: धातु: शब्दरूपेण परावर्तते, शब्दप्रयोगश्च विशेष्यरूपेण भवति। अत: अस्य लिङ्ग-विभक्ति- वचनञ्च विशेषणानुसारं निर्धार्यन्ते।

संयोजनेन शतृप्रत्ययस्य 'अत्' इति धातुषु प्रयुज्यते। पुल्लिङ्गे रूपाणि 'गच्छत्' शब्दानुसारं, स्त्रीलिङ्गे पुन: 'ती' इति संयोज्य (गच्छन्ती) 'नदी' शब्दानुसारं, नपुंसकलिङ्गे च 'जगत्' इति शब्दानुसारं भवन्ति।



Reprint 2025-26

**2. अधोलिखितानि वाक्यानि पठित्वा अधुना एतत्सर्वम् प्रयोगेण जानीम: —**

यथा- **(गम् + शतृ )** गन्छन्त्या बालिकया फलं खाद्यते।

| **हसन्तम्, पृच्छद्भि:, गच्छन्त्या, पश्यन्त:, यच्छते।** |
|---|

i. पिता ........................ **(हस् + शतृ)** पुत्रं पठनाय कथयति।

ii. पुस्तकं ........................ **(दा + शतृ)** छात्राय पुस्तकालयाध्यक्ष: परीक्षाया: प्रवेशपत्रं यच्छति।

iii. नाटकं ........................ **(दृश् + शतृ)** दर्शका: करतलवादं कुर्वन्ति।

iv. मार्गं ........................ **(प्रच्छ् + शतृ)** पथिकै: छायायां विश्रम्यते।

**3. अधुना समुचितपदप्रयोगेण रिक्तस्थानानि पूरयत —**

i. रूप्यकाणि ........................ श्रमिक: प्रसन्न: भवति। (गणयन्/गणयतागणयन्तम्)

ii. जलं ........................ छात्रेण कक्षायां स्थीयते (पिबन्/पिबता/पिबन्तम्)

iii. पुत्रीं ........................ (पाल् + शतृ) माता गीतं गायति (पालयन्ती/पालयत्यै/पालयन्तीम्)

iv. भोजनं ........................ (पच् + शतृ) सूदाय शाकानि प्रयच्छ। (पचन्तम्/पचति/पचते)

v. स: उपरि ........................ (दृश् + शतृ) पतति। (दृश्यन्/पश्यन्/पश्यन्ती)

## शानच् प्रत्यय:

**याचमानाय** भिक्षुकाय धनं यच्छ।

वृद्धाश्रमे **सेवमानानां** बालिकानां नामानि वद।

पूर्णचन्द्रेण **शोभमानायां** निशायां नौकाविहार: अतीव रोचते।

मालाकार: उद्यानात् पुष्पाणि **नयन्तीम्** बालिकां पुष्पत्रोटनात् वारयति।

अत्रापि मोदमान:, याचमानाय, सेवमानानाम्, शोभमानायाम्, नयन्तीम् इत्येतानि पदानि अपूर्णक्रियायै प्रयुक्तानि परमत्र शतृप्रत्ययस्य स्थाने शानच् प्रत्यय: प्रयुक्त: यत: अत्र प्रयुक्ता: धातव: आत्मनेपदिन: सन्ति। अस्य प्रत्ययस्य शकार: मकारे परिवर्त्य चकारस्य लोपेन 'मान' इति अशं धातुभिस्सह संयोज्य शब्दनिर्माणं भवति। पुल्लिङ्गे, स्त्रीलिङ्गे, नपुंसकलिङ्गे च शब्दरूपाणि क्रमश: देववत्, रमावत्, फलवच्च भवन्ति।



© NCERT not to be republished
Reprint 2025-26

**1. अधुना समुचितपदप्रयोगेण रिक्तस्थानानि पूरयत —**

i. नाटकम् .................... जनाः प्रसीदन्ति। (ईक्षमाणः/ईक्षमाणौ/ईक्षमाणाः)

ii. सज्जनानां मैत्री क्रमेण .................... भवति। (वर्धमाना/वर्धमाने/वर्धमानाः)

iii. शीतेन .................... वानरं खगाः गृहनिर्माणाय अकथयन् (कम्पमानः/कम्पमानम्/कम्पमानेन)

iv. दीपावल्यां प्रकाशेन .................... वीथिषु अमावस्यायाः अन्धकारः सर्वथा नश्यति। (शोभमानायाम्/शोभमानयोः/शोभमानासु)

v. वृद्धः .................... बालिकायै आशीर्वचनानि कथयति। (सेवमानायाः/सेवमानाम्/सेवमानायै)

**2. उदाहरणानुसारं पूर्वक्रियायां शतृ/शानच् प्रत्यय-प्रयोगेण वाक्यानि पुनः लिखत-**

**यथा**– शिशुः चलति, सः रोदिति – **चलन्** शिशुः रोदिति।

याचकः याचते। सः एकं गृहं गच्छति।

**यथा**– **याचमानः** याचकः एकं गृहं गच्छति।

उपदेशकः उपदिशति। सः ज्ञानचर्चां करोति।

उषा गायति। सा उद्याने भ्रमति।

सैनिकः युद्धक्षेत्रे प्रहरति। सः शत्रुं मारयति।

बालिका दुग्धं पिबति। सा प्रसन्ना भवति।

मोहनः दुःखं सहते। सः ईश्वरं प्रार्थयति।

### क्तिन् प्रत्ययः (ति)

देश की बहुत सी भाषाओं में क्तिन् प्रत्ययान्त शब्दों का प्रयोग होता है, जिन्हें हम सहजता से समझ सकते हैं।

अस्य प्रत्ययस्य प्रयोगः भाववाचकसंज्ञापदानां निर्माणाय भवति यथा —

श्रु + क्तिन् - श्रुतिः
स्तु + क्तिन् - स्तुतिः
कृ + क्तिन् - कृतिः
मन् + क्तिन् - मतिः



© NCERT not to be republished

एतेषां पदानां शब्दरूपाणि मतिशब्दवद् भवन्ति।

**1. अधोलिखितवाक्येभ्यः क्तिन्–प्रत्यययुक्तान् शब्दान् आदाय उदाहरणानुसारं प्रकृति-प्रत्यय-विभागं कुरुत —**

| | | | |
|---|---|---|---|
| रामायणम् वाल्मीकेः कृतिः अस्ति- | कृतिः- | कृ+ | क्तिन् |
| i. मनुष्यजन्मनः प्राप्तिः पुण्येन भवति। | .................... | .................... | .................... |
| ii. रमायाः बुद्धिः अत्युत्तमा। | .................... | .................... | .................... |
| iii. भक्तः ईश्वरस्य भक्तिं करोति। | .................... | .................... | .................... |
| iv. वानरस्य दृष्टिः फले अस्ति। | .................... | .................... | .................... |
| v. सिंहात् कस्य भीतिः न जायते? | .................... | .................... | .................... |

### तद्धितप्रत्ययाः

### मतुप् (मत्)

देश की बहुत सी भाषाओं में मतुप् प्रत्ययान्त शब्दों का प्रयोग होता है जिन्हें हम सहजता से समझ सकते हैं। वाला अर्थात् इसके पास है, इस अर्थ में स्वरान्त शब्दों से मतुप् प्रत्यय का योग किया जाता है। उप् का लोप होकर केवल यत् जुड़ता है।

यथा — **शक्तिमान्** जनः स्वशक्तेः प्रयोगं यथास्थानमेव कुर्यात्।

**श्रीमान्** श्रिया युक्तः भवति।

**बलवान्** जनः स्वबलस्य प्रयोगं दुर्बलेषु न कुर्यात्।

**गुणवान्** एव गुणानां महत्त्वं जानाति।

**कीर्तिमतः** कीर्तिः स्वयमेव प्रसरति।

'अस्यास्ति' इत्यर्थे युक्ततायाः बोधने मतुप् (मत्) प्रत्ययस्य प्रयोगः भवति। शब्दान्ते अकारः यद्यस्ति तदा **'मतुप् (मत्)'** इत्यस्य परिवर्तनं **'वतुप् (वत्)'** इत्येतस्मिन् भवति।

प्रत्यययोजनानन्तरं रूपाणि **'भवत्'** इति हलन्तशब्दानुसारं भवन्ति।

यथा उपर्युक्तवाक्येषु 'कीर्तिमतः' शब्दस्य प्रयोगः षष्ठ्यां विभक्त्यां कृतः।

**समुचितशब्दं** (✓) इति चिह्नेन चिह्नीकुरुत, प्रदत्तस्थाने च लिखत —

i. मधुवान्/मधुमान् मधु खादति। ........................................

ii. बलवन्तं/बलमन्तं जनं पश्य। ........................................



Reprint 2025-26

iii. विद्यामान्/विद्यावान् जगति शोभते। ..........................

iv. रूपवता/रूपमता स्वरूपस्य गर्व: न करणीय:। ..........................

v. कीर्तिमता/कीर्तिवता कविकालिदासेन अभिज्ञानशाकुन्तलं नाम नाटकं रचितम्। ..........................

### णिनि (इनि)

देश की बहुत सी भाषाओं में णिनि प्रत्ययान्त शब्दों का प्रयोग होता है जिन्हें हम सहजता से समझ सकते हैं।

**युक्ततायाः अर्थे एव इनि (इन्) प्रत्ययस्य योगः क्रियते।**

यथा — रथेन युक्त:- रथी (रथिन्)

बलेन युक्त: - बली (बलिन्)

धनेन युक्त: - धनी (धनिन्)

गुणेन युक्त: - गुणी (गुणिन्)

एतेषां प्रयोग: अपि वाक्येषु शब्दरूपनिर्माणाय क्रियते।

**विशेषण- विशेष्यपदानि योजयत —**

| | | | |
|---|---|---|---|
| धनिना | राजानम् | .............. | .............. |
| गुणिने | राज्ञि | .............. | .............. |
| रथिनम् | पुरुषेण | .............. | .............. |
| बलिनि | शासकम् | .............. | .............. |
| दण्डिनम् | नृपाय | .............. | .............. |

### तरप्-तमप् (तर-तम)

देश की बहुत सी भाषाओं में तरप्-तमप् प्रत्ययान्त शब्दों का प्रयोग होता है जिन्हें हम सहजता से समझ सकते हैं।

| | | |
|---|---|---|
| लघु: | लघुतर: | लघुतम: |
| प्रशस्य: | प्रशस्यतर: | प्रशस्यतम: |
| कुशल: | कुशलतर: | कुशलतम: |

एभि: उदाहरणै: स्पष्टं भवति यत् तुलनायां तरप्-तमप्प्रत्ययस्य प्रयोग: भवति। यदा द्वयो: मध्ये तुलना क्रियते तदा तरप्प्रत्ययस्य, यदा च अधिकै: सह तुलना तदा तमप्प्रत्ययस्य प्रयोग: भवति।



Reprint 2025-26

© NCERT not to be republished

**1. अधोलिखितवाक्येषु समुचितपदेन रिक्तस्थानपूर्तिं कुरुत —**

i. अविनाशः स्वकार्ये .................................. । (पटुः/पटुतरः/पटुतमः)

ii. सर्वेषु छात्रेषु प्रमोदः .................................. । (कुशलः/कुशलतरः/कुशलतमः)

iii. फलेषु आम्रफलम् .................................. । (मधुरम्/मधुरतम्/मधुरतमम्)

iv. अश्वगर्दभयोः मध्ये अश्वः .................................. । (तीव्रः/तीव्रतरः/तीव्रतमः)

v. गीतासुशीलयोः मध्ये गीता .................................. । (कुशला/कुशलतरा/कुशलतमा)

vi. वृक्षेषु देवदारुवृक्षः .................................. । (उच्चः/उच्चतरः/उच्चतमः)

**मयट् प्रत्ययः (मय)**

देश की बहुत सी भाषाओं में मयट् प्रत्ययान्त शब्दों का प्रयोग होता है जिन्हें हम सहजता से समझ सकते हैं।

- प्रचुरतायाः अर्थे मयट् (मय) प्रत्ययस्य प्रयोगः भवति।
- वस्तुवाचकशब्दैः (खाद्यवस्तूनि विहाय) विकारार्थेऽपि मयट् प्रत्ययस्य प्रयोगः भवति।

यथा — स्वर्णमयः, तेजोमयः, मृण्मयः इत्यादि।

**1. मयट्प्रत्यययुक्तानि पदानि आदाय प्रकृति-प्रत्यय-विभागं कुरुत —**

i. सौन्दर्यमयी कलिका उद्याने शोभते। .................................. ..................................

ii. स्वर्णमयम् आभूषणं बहुमूल्यं भवति। .................................. ..................................

iii. तुला लौहमयी भवति। .................................. ..................................

iv. शान्तिमयं जीवनमेव श्रेयस्करम्। .................................. ..................................

v. आनन्दमयं सुखमयम् च विद्यार्थिजीवनम्। .................................. ..................................

**स्त्री-प्रत्ययाः**

(देश की बहुत सी भाषाओं में स्त्री-प्रत्ययान्त शब्दों का प्रयोग होता है जिन्हें हम सहजता से समझ सकते हैं।)

पुल्लिङ्गशब्देभ्यः स्त्रीलिङ्गपदनिर्माणाय ये प्रत्ययाः प्रयुज्यन्ते ते स्त्रीप्रत्ययाः इति कथ्यन्ते। प्रमुखाः स्त्रीप्रत्ययाः सन्ति —

**(क) टाप्, डाप्, चाप् (एषु 'आ' अवशिष्यते।)**

**(ख) ङीप्, ङीष्, ङीन् (एषु 'ई' अवशिष्यते।)**



© NCERT not to be republished

Reprint 2025-26

(क) यथा–

| | | | | | |
|---|---|---|---|---|---|
| अज | - | अजा | बालक | - | बालिका |
| बाल | - | बाला | सेवक | - | सेविका |
| सरल | - | सरला | नायक | - | नायिका |
| कृष्ण | - | कृष्णा | मूषक | - | मूषिका |

(ख) यथा–

| | | | | | |
|---|---|---|---|---|---|
| गोप | - | गोपी | मृदु | - | मृद्वी |
| देव | - | देवी | पटु | - | पट्वी |
| नद | - | नदी | साधु | - | साध्वी |
| व्याघ्र | - | व्याघ्री | गुरु | - | गुर्वी |

## अभ्यासः

**1. प्रदत्तवाक्येषु लिङ्गपरिवर्तनं कृत्वा वाक्यानि पुनः लिखत-**

**यथा- एकः बालः जलं पातुम् इच्छति। एका बालिका जलं पातुम् इच्छति।**

i. सः सेविकाम् आकारयति। ..........................

ii. अस्य नाटकस्य नायकः कः अस्ति? ..........................

iii. आचार्यः स्नेहेन पाठयति। ..........................

iv. चतुरा बालिका सम्माननीया। ..........................

v. श्रीमान् कुत्र गच्छति? ..........................

vi. सभायाम् अनेके विद्वांसः आगच्छन्। ..........................

vii. बुद्धिमान् बालः पुरस्कारं लभते। ..........................

viii. गतवती महिला किम् उक्तवती? ..........................

© NCERT not to be republished



Reprint 2025-26

9

0975CH09

# समासा:



(अध्यापक: कक्षायां प्रविशति। छात्रा: उत्थाय अभिवादनं कुर्वन्ति।

अध्यापक: – (एकं छात्रम् उद्दिश्य) पङ्कज! किमर्थं खिन्न: इव दृश्यसे?

पङ्कज: – गुरुवर! एष शुभङ्कर: माम् सर्वदा 'पङ्के जात:' इति सम्बोधयति। न रोचते एतत् मह्यम्।

मनोज: – आम् गुरुवर! एष: माम् अपि 'मनसि जायते' इति उपहसति।

यशोदा – परम् यदा एष: माम् 'यश: ददाति या' इति कथयति तदा अहं तु प्रसन्ना भवामि।

घनश्याम: – माम् अपि एष: 'घन इव श्याम:' इति कथयति।

सुरेश: – माम् तु एष 'सुराणाम् ईश:' इति कथयति।

सर्वे छात्रा: – गुरुवर! कृपया एनम् अवबोधयतु येन स: एवं मा व्यवहरेत्।

अध्यापक: – (विहस्य) शुभङ्कर! किं त्वम् आत्मन: नाम अपि 'शुभं करोति' इति एवम् उच्चारयसि?

(सर्वे छात्रा: उच्चै: हसन्ति।)

अध्यापक: – भो छात्रा:! भवताम् नाम्नां कृते शुभङ्कर: यानि कानि अपि पदानि प्रयोजयति तानि न कथमपि अनुचितानि। वस्तुत: स: युष्माकं नाम्नां विग्रहम् एव प्रयोजयति।

© NCERT not to be republished

छात्रा: – कृपया विस्तरेण बोधयन्तु।

अध्यापक: – बाढम्। ध्यानेन एतत् कथनं शृणुत- एकदा नीले अक्षिणी यस्या:, सा माता च पिता च, तौ प्रणम्य, लम्बम् उदरम् यस्य तम्, घन इव श्यामम्, पार्वती च परमेश्वर: च, तौ प्रणतवती, गृहस्य उद्याने विशाल: च एष: वृक्ष:, तत्र आरूढम् एकं वानरम् अपश्यत्।

छात्रा: – गुरुवर! भवत: कथनम् अवगन्तुम् अक्षमा: वयम्।

अध्यापक: – अधुना पुन: शृणुत- एकदा नीलाक्षी पितरौ प्रणम्य लम्बोदरं घनश्यामं पार्वतीपरमेश्वरौ च प्रणतवती। तत: गृहोद्याने विशालवृक्षारूढम् एकं वानरम् अपश्यत्।

प्रथमं मया यानि पदानि प्रयुक्तानि तानि विग्रहवाक्यानि आसन्। पुन: मया तत्स्थाने समस्तपदानि प्रयुक्तानि। एतद्विषयं विस्तरेण एवम् अवगच्छाम: - यदा अनेकपदानां स्थाने विभक्तिलोपं कृत्वा एकपदं प्रयुज्यते तदा तत् पदं समस्तपदं भवति। समासप्रक्रियायाम् अनेन भाषासौष्ठवं लाघवं च परिज्ञायते। कथितमस्ति - **'समसनं समास:**।'

समासस्य मुख्यत: चत्वार: भेदा: सन्ति - अव्ययीभाव:, तत्पुरुष:, द्वन्द्व:, बहुव्रीहिश्च। तत्पुरुषस्यौ अन्यौ द्वौ मुख्यभेदौ अपि स्त: - कर्मधारयंद्विगुश्च। एतदतिरिक्तम् अलुक्, नञ्, उपपदतत्पुरुष: च अस्य भेदा: भवन्ति।

अस्मिन् अध्याये वयम् केवलं तत्पुरुष-द्विगु-द्वन्द्व-समासानां विशिष्टम् अभ्यासं करिष्याम:।

### तत्पुरुष: समास:
### (उत्तरपदप्रधान: तत्पुरुष:)

अस्मिन् समासे उत्तरपदं प्रधानं भवति। विग्रहे पूर्वपदेन सह विभक्तिप्रयोग: भवति। विग्रहे या विभक्ति: प्रयुज्यते तया नाम्ना एवास्य तत्पुरुष-समासस्य नाम भवति।

यथा —

| **समस्तपदानि** | **विग्रह:** | **समासनाम** |
|---|---|---|
| शरणागत: | शरणम् आगत: | द्वितीय-तत्पुरुष: |
| हरित्रात: | हरिणा त्रात: | तृतीया-तत्पुरुष: |
| पाकशाला | पाकाय शाला | चतुर्थी-तत्पुरुष: |
| रोगमुक्त: | रोगात् मुक्त: | पञ्चमी-तत्पुरुष: |
| राजपुरुष: | राज्ञ: पुरुष: | षष्ठी-तत्पुरुष: |
| जलमग्न: | जले मग्न: | सप्तमी-तत्पुरुष: |
| युधिष्ठिर: | युधि स्थिर: | अलुक्-तत्पुरुष: |



Reprint 2025-26

© NCERT not to be republished

| | | |
|---|---|---|
| कुम्भकारः | कुम्भं करोति इति | उपपद-तत्पुरुषः |
| अज्ञानम् | न ज्ञानम् इति | नञ्-तत्पुरुषः |

- नञ्-तत्पुरुषे यदि पदस्य प्रथमवर्णः स्वरः भवति तदा समस्तपदे 'न' स्थाने 'अन्' प्रयुज्यते परं यदि शब्दस्य प्रथमवर्णं व्यञ्जनं भवति तदा 'न' स्थाने 'अ' प्रयुज्यते।

## द्विगुः समासः
## (संख्यापूर्वो द्विगुः)

यस्मिन् समासे प्रथमपदं संख्यावाचि भवति समाहारस्य (एकत्रीकरणस्य) च भावः अस्ति सः द्विगुसमासः भवति।

यथा —

| **समस्तपदम्** | **विग्रहः** |
|---|---|
| पञ्चपात्रम् | पञ्चानां पात्राणां समाहारः |
| चतुर्युगम् | चतुर्णां युगानां समाहारः |
| त्रिभुवनम् | त्रयाणां भुवनानां समाहारः |
| अष्टाध्यायी | अष्टानाम् अध्यायानां समाहारः |

## द्वन्द्व-समासः
## (उभयपदार्थप्रधानो द्वन्द्वः)

द्वन्द्वसमासे उभयोः पदयोः प्रधानता भवति। विग्रहे प्रतिपदं पश्चात् 'च' इति पदस्य प्रयोगः भवति।

यथा —

| **समस्तपदम्** | **विग्रहः** |
|---|---|
| रामकृष्णौ | रामः च कृष्णः च |
| पितरौ/मातापितरौ | माता च पिता च |
| कन्दमूलफलानि | कन्दं च मूलं च फलं च |
| पाणिपादम् | पाणी च पादौ च |

## अभ्यासः

**1. प्रदत्तपदानां विग्रहं कृत्वा समासनाम लिखत —**

| **समस्तपदम्** | **विग्रहः** | **नाम** |
|---|---|---|
| **विद्यालयः** | **विद्यायाः आलयः** | **तत्पुरुषः** |
| i. सप्तर्षिः | ........................................ | ........................................ |
| ii. खलसज्जनौ | ........................................ | ........................................ |



© NCERT not to be republished

Reprint 2025-26

iii. गृहोद्याने .................... ....................
iv. विभवहीना: .................... ....................
v. चतुर्भुजम् .................... ....................
vi. पत्रपुष्पे .................... ....................
vii. लौहघटिता .................... ....................
viii. खगोत्तम: .................... ....................
ix. सुखदु:खे .................... ....................
x. त्रिलोकी .................... ....................

**2. प्रदत्तपदेषु समासं कृत्वा समासनाम लिखत —**

| **विग्रह:** | **समस्तपदम्** | **नाम** |
|---|---|---|
| **कुसुमानाम् आवलि:** | **कुसुमावलि:** | **तत्पुरुष:** |
| i. सप्तानां पदानां समाहार: | .................... | .................... |
| ii. परेषाम् उपकार: | .................... | .................... |
| iii. राम: च लक्ष्मण: च | .................... | .................... |
| iv. न पेयम् | .................... | .................... |
| v. धर्म: च अर्थ: च | .................... | .................... |
